In Public domain. Digitization Muthulakshmi Research Academy

156. 1848. 156 150
P873
338. A.

॥ द्विकालोत्तरव्याख्या ॥ अनन्तशंभु?

वरगुरुचरणार्थं काश्यपेशं गणेशम्
अपि भरतकवल्लीमम्बिकामन्त्यप्रणवम् ।
अनुपदगतवृत्तिर्द्विकालोत्तरस्य
परशिवसमकृत्यै ज्ञानपादं वच्मि ॥

अथ ज्ञानपादजिज्ञासया महादेव्या
सर्वेषामपि मुक्त्यर्थं मुक्तिमार्गस्य दर्शनम् ।
देवेश ज्ञानमाचारं कृपया कथयस्व मे (1) ॥

देवनशीलत्वाद्देवा विष्णुप्रभृतयो गुरुक्रमागतास्तेषा-
स्तेषामीशः प्रवर्तकः । गुरुरित्यर्थः । अतो ममापि
प्रष्टव्यमस्तीति स्वापेक्षामयोगि देवेशपदेन भगवन्तं
सम्बोध्य भगवती स्वापेक्षां वक्ति ज्ञानमाचारं कथयस्वेति ।
अत्र ज्ञानपदसन्निधानात् आचारं ज्ञानाचारमेव ।
कर्मकाण्डोक्ताचाराणां पादत्रयेषु सुविस्तरेण श्रूयमाण-
त्वाच्च । अथाणिमादिसिद्धिभेदेन ज्ञानस्यापि बहु-
विधत्वात् किंरूपं ज्ञानं श्रोतुमिच्छसीत्याकांक्षायामाह —
मुक्तिमार्गस्य दर्शनमिति । सिद्धिविषयज्ञानानां प्राग्वि-
स्तरेण श्रूयमाणत्वान्मोक्षोपायप्रदर्शनरूपज्ञानमेव मम
श्रोतुमिच्छेत्यर्थः । मुक्तिर्नाम मलादिपाशविच्छित्ति-
स्सर्वज्ञानस्सर्वज्ञानक्रियोन्मेषः । तत्प्राप्तिमार्गोऽत्र -

In Public domain. Digitization Muthulakshmi Research Academy

स्वात्मसाक्षात्कार एव । तदुपायं विना मुक्तिनिमित्त-
-निष्कलशिवध्यान समाध्ययोगात् । किञ्चारब्ध-
-कार्यकर्मोपरोधेन दीक्षया क्षपितमलादिना युक्तत्वाच्च
तत्प्राप्तिस्तैर्विघ्नैर्बाध्यते । तदपोहनञ्च तत एव हि ।
तदुक्तं श्रीमन्मृगेन्द्रे —

अथानात्मवतां मत्वा स्वाधिकारं सुदुष्करम् ।
यतेरन्नात्मवत्तायै दीक्षिका वा जिगीषव इति ॥

तत्रोऽस्य स्वात्मसाक्षात्काररूपस्य दुर्लभं प्रकाशनं ज्ञानं
जायतेऽनेनेति ज्ञानमुपायं कथयस्वेति प्रश्नार्थः । नन्वेतद्रूप-
ज्ञानोपलब्धि विषय प्रार्थनान्वितः परं मुमुक्षूणामेव तत्प्राप्ति-
-युक्त्या त्वया किमर्थं प्रार्थ्यत इत्यत्राह । सर्वेषामपि
मुक्त्यर्थमिति । सत्यम् । पूर्वं युष्माभिर्मसात्यन्तमल-
-परिपाकं शक्तिनिपातञ्च ज्ञात्वा स्त्रीत्वशङ्कां विहाया-
-चार्याभिषेकान्तदीक्षां निर्वर्त्य महागुरूणां मध्ये त्वदनन्तर-
-गुरुत्वे नियुक्तत्वात् परिपाकवशान्मदन्तं प्राप्तानां सर्वे-
-षां देवादिमानुषान्तानामनुग्रहकरणार्थमवश्यं ज्ञातव्य
. . . । यदुक्तं

सदाशिवमनन्तञ्च श्रीकण्ठं पुनरम्बिकाम् ।
गुहं विष्णुञ्च धातारमिति सप्त गुरून्स्मरेत् इति ॥

अपि शब्दान्ममाप्यधिकारमलमुक्त्यर्थं ज्ञातव्यमेव-

In Public domain. Digitization Muthulakshmi Research Academy

. . . .

. . - . - . .

यजते शंभुं मन्त्ररूपकाशयात्मनः परेषामपीति ।
कृपयेति तद्विश्वातिशय ज्ञापनार्थमेतत् । अत्यन्तं स-
-भक्तिविकलाद्यहत्त्वं सर्वानुग्रहकारः . . .

. . . . - . -

. - - . . .

. - - - - भगवानाह ।

ज्ञानाचारो वरारोहे कथयामि तवाधुना ।
प्रविशन्ति यतो मोक्षं ज्ञानिनो ध्वस्तकल्मषाः ॥
वरा श्रेष्ठा गुरुत्वविस्तारयुक्ता आरोहा - - -

. - . - - .

. . . - .

. . . प्रदर्शितं ज्ञानं यथेप्सितं सा वरारोहा । अधु-
-नेति । एतज्ज्ञानाहि प्रार्थनाकालापेक्षया पुरा नो

. . . .

. . . . . . -

. . . - - . - इति कृत्वा तदन्यत्
पत्याद्रि पदार्थ विचारात्मकं प्रक्रिया ज्ञानिनः ।
यदुक्तं । न परं प्रक्रिया - . . .

In Public domain. Digitization Muthulakshmi Research Academy

दुपायज्ञानमात्रादेवं मुक्ता भवन्तीति व्याख्येयम् ।

338. ७..

प्रत्यादि पदार्थ विचारात्मक

वयं संप्रवक्ष्यामि उपायतत्त्वतो गुह ।
अग्राह्यस्यापि सूक्ष्मस्य स ॥

मोक्ष इति दृश्यते ।
येषां बोधेन सञ्जातं कालज्ञानं वरानने ॥
न तेषां जाय

In Public domain. Digitization Muthulakshmi Research Academy

क्तिनिपातस्ततो धिया सा ततो गुरुं प्रति गमन-
-न्ततो दीक्षा ततो ज्ञानाभ्यासस्ततश्चिन्तनयस्ततस्सा-
-क्षात् . . . .

. . . . . श्रुतौ ।

शिवेच्छया पुरानन्ता शैवी शैवार्थदायिका ।
साशक्तिरापतत्याद्या पुंसो जन्मन्यपश्चिमे ॥
तन्निपातात्सरस्वस्य मलं संसारकारणम् ।
. . . . या सास्यात् परनिश्रेयसं प्रति ॥
सदेशिक . . . . . दीक्षाविच्छिन्नबन्धनः ।
प्रयाति शिवसायुज्यन्निर्मलो निरुपप्लव इति ॥

एवं श्रुतं कालज्ञानं येषामिति प्रकृतत्वात् पूर्वोक्तप्रक्रि-
-या ज्ञानिनां बोध इति बुद्धौ परिपाकमान्द्यान्नसञ्जा-
-यते तदा तेषां शास्त्रकोटिशतैरपि पत्यादिपदार्थ-
-विचारात्मकज्ञानप्रतिपादकानेकशास्त्राभ्यासे कृतेऽपि
सत्यपि बोध इति लक्षणया शिवादिसाक्षात्कारो
नोत्पद्यते शिवादिवस्तुनैव तस्य प्रत्यक्षी भवतीत्यर्थः।
इत्यनेन ग्रन्थद्वयेन देव्या प्रार्थितस्य मुक्तिमार्गस्य
दर्शनं ज्ञानं कथयस्वेत्याभ्युपगमः प्रोक्तः ॥ 3
अथाचारं कथयस्वेत्यस्याभ्युपगम उच्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

अतो हि निर्भयो विद्वान्निस्सङ्गो विगतस्पृहः ।
ज्ञानोत्साहपरो भूयाच्छ्रद्धानो निराकुलः ॥
निर्ममः करुणोपेतस्सर्वभूताभयप्रदः ।
भवेत्कालोत्तरं देवि मुमुक्षुर्योगतत्परः ॥

इति यस्मात् कालज्ञानाभ्यासो मुमुक्षूणामवश्यं कर्तव्य एवेत्युक्तस्तस्मात्कारणात् निर्भयाद्याचार-युक्तस्तदभ्यस्तव्यमिति तात्पर्यार्थस्तत एव मादि ज्ञानाचारञ्च वक्ष्यामीति भावः । निर्भय इति । अनादिवासनायुक्तपुत्रदारादिसंसारपरित्यागः कथं करोमीति कातराणां मतौ भीतिर्भवत्येव तदभावयुक्तः प्रथमं संसारवासनापरित्यागः कर्तव्य इत्यर्थः । पुनः किंभूतः विद्वान् हेयोपादेयज्ञानी । तस्यैव श्रेष्ठा-श्रेष्ठवस्तु व्यवहारो भवति । नान्यस्य । निस्सङ्गः । किञ्चिद्द्रव्यपरिग्रहः । सन्यासाश्रमी भूत्वेत्यर्थः । विगतस्पृहः सन्यासिनामपि देहसद्भावात्तत्परिपोषण-निमित्तान्नाच्छादनादिवस्तुषु सक्ता भवत्येव तत्यक्तः । विषयेषु अतिपराङ्मुख इत्यर्थः । ज्ञानोत्साहपरः । एतज्ज्ञानाभ्यास एव सदोद्युक्तः । भूयाच्छ्रद्धावान् । विघ्नै-र्बाध्यमानोऽपि पुनःपुनस्तदभ्यास एव श्रद्धाधिक्ययुक्तः ।

In Public domain. Digitization Muthulakshmi Research Academy

निराकुलः मुक्त्युपाय प्रतिपादकवचनानां बहुविधत्वा-
त्तान्युपश्रुत्य किंकुर्म्म इति साकुलो भवत्येव तदभा-
व युक्तः । निर्म्ममः । तत्त्वज्ञानाभ्यासादणिमादिसिद्धि-
युक्तोपि तत्पराङ्मुखस्सन् गुर्वादिषु दासभावं गतः ।
करुणोपेतः । शिववत्परानुग्रह कृपा युक्तः । सर्वभूताभ-
य प्रदः । उपकारापकारेषु हर्षकोपरहितः । तदुक्तं
न हृष्यत्युपकारेण नापकारेण कुप्यति . ।
(339. b. य . . . . सर्वभूतेषु जीवन्मुक्तस्स इष्यति ॥

In Public domain. Digitization Muthulakshmi Research Academy

391. a. .. वेभूतेषु जीवन्मुक्त स्सदृश्यत इति । योगतत्परः।
यमनियमादियुक्तः । यदाह पतञ्जलिः · ·
सा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रहा यमः · · · व
सन्तोषतपस्स्वाध्यायेश्वरप्रणिधाना नियमा इति ।
अन्ययोगाङ्गान्यपि ज्ञात्वा स्वात्मसाक्षात्कारोपायज्ञाना-
भ्यासं कुर्यादित्यर्थः। इत्येतदुक्तं विशेष · · मुमु-
-णामपि समानत्वान्मुमुक्षुरिति विशेष्य पदम् ।
एवं श्रुतौ मोक्षेच्छुः कालान्तरं भवेत् । स्वात्मसाक्षा-
-त्कारज्ञानाभ्यासं कुर्यात् ॥

अथ प्रसङ्गात्साधकस्य महत्वमाह ।

स ब्रह्मा स शिवो विष्णुः स इन्द्रश्च हुताशनः ।
स गुरुस्सर्वदेवाश्च स योगी स तपोधनः ॥
पण्डितस्स महाभागः कृतार्थः परमार्थतः ।

अयमर्थः। आत्मनस्सर्वधर्मसद्भावात्तज्ज्ञाननिष्ठो योगी लीलया ब्रह्मादिदेवताधर्माणां मध्ये यद्देवताधर्मत्व-मिच्छति तदचिरेण तद्भावतया प्राप्नोतीति निश्चयात् स एव ब्रह्मेत्यादिनोपचर्यत इति ॥ तदुक्तं सर्वज्ञानोत्तरे।

सर्वे धर्मात्मनस्सन्ति यथैव परिकल्पयेत् ।
तत्तद्भवत्यसन्देहात् सद्यस्तद्भाव भावतः इति ॥

ब्रह्मविष्णुपदसामीप्यात् शिवश्रीकण्ठनाथ एव

In Public domain. Digitization Muthulakshmi Research Academy

देवशब्दसन्निधानात् गुरुर्बृहस्पतिः ।

अथ तज्ज्ञानं लक्ष्यमुपक्रम्य तत्कालज्ञानमिति लक्षि-तत्वात् तज्ज्ञानाभ्यासपूर्वभावि चित्तजयलक्षण- ..म.. । तदन्येषां मलपाकादीनामप्यात्सिद्धत्वाद्बुद्धि-तानकृताखिलः परन्तु चित्तजय एव कार्यस्ततस्स-र्वैरसाध्यो मोक्षोऽचिरेण सिध्यतीत्युच्यते ।

चलद्वायुसमञ्चित्तं ध्रियते येन निश्चलम् ।
स उपायो विमोक्षस्य सद्रूपान्तगुणस्तु सः ॥
सा प्रज्ञा तद्धि हि स्थैर्यं तत्पुण्यं व्यवसायिनाम् ।
तदेव तीर्थस्नानञ्च स तपश्च न संशयः ॥

व्यवसायिनामिति पुरुषार्थसाधनोद्युक्तानां परमं साधनं तदेव यद्वायुसमसञ्चलयुक्तं चित्तं मनो येनेति प्राणायामादिना निश्चलन्ध्रियते । ततस्तेषां पुरुषार्थ-चतुष्टयमचिरेण सिध्यति । तस्माद्धिहापि मोक्षवि-षयेति तज्ज्ञानाभ्यासस्य स एव चित्तजयः परमोपायः । स एव सद्रूपान्तगुण इति सद्भिर्मोक्षोपायत्वेनाङ्गीकृत-गुणद्वेषानिष्टसम्बुद्ध्यादिभिश्च । तदुक्तं

न हृष्यत्युपकारेण नापकारेण कुप्यति ।
यस्समस्सर्वभूतेषु जीवन्मुक्तस्स इष्यत इति ॥

सा प्रज्ञेति । मोक्षोपायप्रकृतिपुरुष.. विवेक..

In Public domain. Digitization Muthulakshmi Research Academy

. . . . ञ्च तद्देव । यदुक्तं ।

ज्ञाना . . स्सर्वकर्माणि भस्मसात्कुरुतेर्जुन इति॥

तद्धि ह स्थैर्यमिति । तद्देव मोक्षसाधने स्थिरभावः ।

मीमांसादिवादिभिर्बोध्यमानेपि चित्तभवे चलनाभावात्॥

तदुक्तं मृगेन्द्रे —:

. . . . नाविधैनैव सः ।

श . . ण न च चा . . . थान्धीशैलस्सार गैरवादिति ॥

तत्पुण्यमिति मोक्षोपायपुण्यञ्च । तद्देवाङ्ग प्रदक्षि-

-णादि । यदुक्तम् ।

स्थित्वा देवालयस्याग्रे प्रादक्षिण्य त्रयं स्. . . . ।

. . . . तीर्थमिति .

. . . . . . क्षोपायश्च तद्देव । तदुक्तं श्रीमत्सर्व-

-ज्ञोत्तरे ।

. . तद्दालयसमीपस्थं यद्यत्तोयं षडानन ।

त . र्थं . . . . स्नात्वा शिवं व्रजेत्॥

. . . .

. . . .

तदुक्तं श्रीमदचिन्त्यविश्वसादाख्ये ।

. . . . . त्योपि नित्यं वै पञ्चविंशति संमितान्।

स्वच्छ . . . .

In Public domain. Digitization Muthulakshmi Research Academy

. . . .

. . . .

. . . .

539.6 . . सर्वञ्चित्तजयभाव . . . . .

. . . .

. . . पायेन बध्येत इति । हे भगवन्

. . निश्चयश्च कश्चित्तजयभावस्तु । तज्जयो-

पायमनुपदिशतामिति । प्रश्नार्थः । तदुत्तरं भगवानाह ।

. . - - - . . . - - - - -

. - - . . - - . . . .

. . . कात्मक प्राणायामैरेव चित्तजयः । . . .

. . इति । यदुक्तं श्रीमन्मृगेन्द्रे :-

प्राणः प्राग्युक्तितो वायुरायामोऽस्य प्रवेशनम् ।

प्रेरणा कृषि . . . - - - . . - .

ततस्तु . . . . . षां . . . चेतसः ।

प्रत्याहारो विधातव्यस्सर्वतो विनिवर्तनम् ॥

तेनेन्द्रियार्थसंसर्गविनिवृत्तेश्चितो मा.. ।

धारणा योग्यतामेति पदे स्वेच्छा प्रकल्पित इति ॥

अथ चित्तजय . .

चित्ते चलति संसारे निश्चले . . क्ष एव तु ।

In Public domain. Digitization Muthulakshmi Research Academy

यस्य मुक्तिसाधन सर्वसामग्री सत्यपि चित्तजय-
-स्यैके कर्त्तव्ये सति तस्य पूर्ववासनया चित्तं संसारे
प्रवर्त्तते। ततस्सोपि संसारी भवति। पुनश्चित्तज-
-ये - - - मुक्तो ति कृत्वा स एव मोक्षइच्छु
प्रवर्त्तते। तस्माच्चित्तजय एव पूर्वं कर्त्तव्य इत्याह।
तस्माच्चित्तस्थिरं कुर्यात् प्रज्ञया परया बुधः ॥
अथ चित्तजयसमाप्तेर्मुख्यं लक्षणमाह ।
ऐकान्तिकं सुखं यत्र तदेवात्यन्तिकं भवेत् ॥
यत्र चित्तजययुक्ते पुरुषे ऐकान्तिकं विचारित-
-रहितं यत्सुखं विषयान्निवृत्यात्मक स्वरूप विषयस्वपक-
-मानन्दं भवति। तदेव चित्तजयस्यात्यन्तिकम-
-तीव मुख्यतमं लक्षणं स्यात्।
तदुक्तं श्रीमान्निश्वासकारिकायाम्
न मनो नापि मन्तव्यो मन्ता च न विभाव्यते ।
स्वलीने विषयैर्मुक्त एको भूतस्सुषुप्तवत् ॥
मनसश्च स्वलीनस्य यत्सुखं ह्यात्मसाक्षिकम् ।
योगावस्था परा ह्येषा प्राहुर्योगविदो जना इति ॥
एवं प्राणायामादिना चित्तं जयति यः पुरुषस्त-
-स्य मनसस्स्वलीनावस्थायां प्राप्तायां सत्यां निष्क-
-र्माणि तस्यैहिकविषयग्रहणकर्मणि निवृत्ते सति

In Public domain. Digitization Muthulakshmi Research Academy

शिवादिपरतत्त्वं विनास्य विषयाभावात् स्वय-
-मेव परे तत्त्वे सक्तस्वान्तकः पण्डितः को वा प्रज्ञा-
-वान् निष्कलतत्त्वध्यानविषये रक्तो न भवति
एवमत एव । स्वेष्ठितार्थग्राही स्वयमेव कालेन
प्राय यद्यपण्डितो विद्धर्षाहिन्नमुच्यति पण्डितस्य
किं पुनरिति यावत् । चित्तलयादनन्तरन्निष्कल-
-तत्त्वभावनाभ्यास एव कर्तव्य इति भावः ।
एवञ्चित्तलयकरणादनन्तरन्निष्कलस्वरूपभावना-
-भ्यासेन स्थूलमतो मुक्तिर्भविष्यतीत्याह । *

निवृत्तो विषयज्ञानान्निष्कलज्ञानतत्परः ।
अनिच्छन्नपि मेधावी लभते मोक्षमव्ययम् ॥

अथादिष्टक्रमेण काललक्षणमुक्त्वा ज्ञानं वक्तुमुपक्रमस्य
ज्ञानन्नाम सकलनिष्कलयोरेव भावनास्वरूपज्ञानमेवे-
-ति कृत्वा तयोर्भेदन्दर्शयितुं प्रथमं सकलस्वरूपम्
लक्षयति ।

अस्मिता कलया युक्तचैतन्यं सकलं स्मृतम् ॥

अस्मिता कलयेति । अहमित्यंशेन युक्तं चैतन्यमिति
अहमित्यंशेन युक्तं चैतन्यमिति यद्यात्मस्वरूपन्त-
-देव सकललक्षणमिति ज्ञातव्यम् । अयमर्थः ।
संसारावस्थायामहं भोक्ताहं ज्ञातेत्यादिरूप आत्म-

In Public domain. Digitization Muthulakshmi Research Academy

परामर्शो जायते तदेव जीवात्मस्वरूपमिति ।

अथ निष्कलस्वरूपं लक्षयति :-

सर्वालम्बविनिर्मुक्तं निष्कलं ज्ञानमुच्यते ॥

मल तिरोधानादि कलादितत्वाद्यालम्बनमात्मन

नस्य शिवस्यैव सर्वस्मात्तत्वादेरालम्ब क्षणा-

-दि निर्मुक्तं यज्ज्ञानरूपमस्ति तदेव निष्कलात्मस्व-

-रूपमित्युच्यते । ननु सर्वालम्बविनिर्मुक्तत्वं

परमुक्त्यवस्थायामेवास्य जीवन्मुक्त्यवस्थायां

कलादिकादिनिर्मु कथं भवतीत्यत्राह :-

अस्मिता रहितश्चैत तथ्यं शक्तिरुच्यते ।

तया प्रकाशितं विश्वं शक्तिध्यानमुदाहृतम् ॥

0.a. सत्यम् । अस्मिता रहितमित्यात्मोन्मुख परो-

-न्मुखं यच्चैतन्यमस्ति तदेवात्मचिच्छक्तिस्वरूपं तया

शिवशक्त्या समर्थीकृतया पुनस्सापेक्षरहितया विश्व-

-मिति शिवादिकं सर्वं प्रकाशितमेव भवति । ततो

जीवन्मुक्त्यवस्थायामपि शक्तिध्यानमिति कलादि-

-कादिनिर्मुक्तभावेऽपि शिवशक्त्योद्दीपित स्वचि-

-च्छक्तिरेवास्य करणं ततो ज्ञानं भवेदित्यदोषः ।

तदुक्तं मोक्षकारिकायाम् :-

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ।

शिवं शक्त्यादिभिस्सार्धं षडध्वात्मा गतावृतिरिति।
इत्येव जीवात्म परमात्म स्वरूपञ्च तयोरैक्य भावनायाः
करणञ्च प्रसाध्य तयोरैक्य भावना प्रकारञ्च तत्फलं
च वक्ति।

अहंसंशेन यच्छून्यं चिन्मात्रालोकमद्वयम् ।
मुक्तिबीजं तदाकारं ध्यातं परयोग प्रवर्तकम् ॥

अद्वयमिति । अहं जीवात्मा मत्तोऽन्यः परमात्मेति
द्वैतभावना रहितम् । किंच । अहंसंशेनेति । अहमि-
ति परिच्छिन्नांशेनाव्यापक भावेन च शून्यं रहितम् ।
चिन्मात्रालोकनमिति । चिन्मात्रस्यालोकनं प्रकाशनम्
परमात्मैवाहमिति प्रत्यक्षीकृतमित्यर्थः। यदात्म-
स्वरूपमस्ति तदेव मुक्तिबीजमिति परमोक्षसाधनम्।
किञ्च परयोगप्रवर्तकमिति परेण शिवेन योगः
परयोगस्तस्य प्रवर्तकं साधकञ्च ततस्तद्ध्येयमेवा-
स्य फलमिति मन्तव्यम्। स्वात्मसाक्षात्कार विषये
कर्मयोगिनोक्त चक्रादिसाधनानि नादरणीयानीत्याह –:

चक्राणि नाड्यः पद्मं देवता बीजमण्डलम् ।
रूपमित्यादिकं किंचिद्ध्येयं नैव कदाचन ॥

चक्राणीति मन्त्रात्मसाधन विषयेप्रोक्तानि द्वादशारादीनि।
यदुक्तं श्रीमत्स्वायम्भुवे –:

In Public domain. Digitization Muthulakshmi Research Academy

द्वादशारस्य चक्रस्य विभिन्नस्य द्विधा पुनः ।
एकैकमा.. कार्धञ्च कुर्यात्पञ्चदशांशकमित्यादि ॥
तानि च नाड्य इति जीवात्मनोपासनविषये चोक्तास्सु-
-षुम्नाद्याः । यदुक्तं श्रीमद्द्विशति कालोत्तरे —
नाभेरधस्ताद्यत्कन्दमङ्कुरन्त.. निर्गताः ।
द्वासप्तति सहस्राणि नाभिमध्ये व्यवस्थिताः ॥
तिर्यगूर्ध्वमधश्चैव व्याप्नुवन्ति तु सर्वशः ।
चक्रवत्संस्थिता ह्येता नाड्यः परिकीर्तिता इति ॥
ताश्च । पद्मं हृ. पद्मादि अन्तर्गतध्यानादिषूक्तम् ।
यदुक्तम् । गुदं मेढ्रान्तमूलस्थं मूल..धारञ्चतुर्दलम् ॥
स्वाधिष्ठानाह्वयञ्चक्रं लिङ्गमूले षडश्रकम् ॥
नाभिदेशे स्थितञ्चक्रं दशारं मणिपूरकम् ॥
द्वादशारं महाचक्रं हृदये . . . . . ॥
. . . देशे विशुद्धाख्यं यच्चक्रं षोडशाश्रकम् ॥
आज्ञा नाम भ्रुवोर्मध्ये द्विदलञ्चक्रमुक्तमित्यादि च ॥

तच्च देवतेति । ब्रह्मादयः ।
उत्क्रान्ति विषये ब्रह्मादिकारणत्यागक्रमे चोक्ताः ।
यदुक्तं श्रीमद्द्विशति कालोत्तरे ।
. . . . कण्ठे विष्णुस . . तः ।
तालुमध्ये स्थितो रुद्रो ललाटे तु महेश्वरः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तदन्ते तु शिवं विद्याद्द्वादशान्ते परात्परमिति ।
अथवा साध्य मन्त्राधिष्ठातृ देवता सद्योजातादयः॥
आद्यं बीजं . - - - - - - - - .

. . . . . . - - . .

. . पं शुद्धस्फटिकाभादि । पञ्चवक्त्र दशभुजादिवा । आदि-
-शब्दात् कीलक ऋषिच्छन्दांसि । पद्माद्यासनं बन्धा-
-दिनाड्यैतत्सर्वं कर्म्मयोगिनस्वसाध्य वस्तु साक्षात्का-
-रविषये आदरणी . . . .

. . . .

. . . . विवक्षितत्वात् चक्रा-
-णि नादरणी . . वेति । अथ प्रसङ्गात् कर्म्मणि
उक्त गुहादि साधनानि च . पेक्षणीयानीत्याह ।
गुहा . . मन्त्रजालञ्च . . - - - -

. . - - - - . . .

. . . . - .

. . . . . . रण्ये -:
मुख . - - नाडञ्चापि दर्शनं वासनन्तथा ।
10.6. प . रञ्च गुहा . वापि वृक्षश्च वन - - - .

. . . . . - .

. . . . . णि ज्ञानिनः - ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रोक्तान्यपेक्षणीयान्येव । तदुक्तं तत्रैव ।

मुखमीशानकञ्चापि ध्येयं शिवमिहोदितम् ।

. - - - - . . . . . :

. . . - - - - . . . .

मनोभङ्गा . . . द्धमन्त्रं गुह्य . . था

जगद्धृक्षोषनं भूतं गोत्रं ऊङ्क्त्वमेव च ।

गोचरं शिवसंज्ञन्तु मन्त्रानं समावम् . .

. . . - - - - - - - .

. - - - - - - - - . . धयेद्धिति

कर्मिणो मुखादिकञ्च विस्तरेणोक्तन्तत्रैव तत . . +

. . बधार्थम् । मन्त्रजालमिति । आकर्ष . . स्तंभ-

-नादि विषये कर्मिण उक्तमन्त्रसमूहमेवात्र ना . .

. - - - - - — - - .

. - - . . . . . मेव ।

तदुक्तं श्रीमत्सर्वज्ञानोत्तरे ।

किञ्चित्कुञ्चितनेत्रस्तु शिवं सम्यक् ततश्चरेत् ।

इति । प्राणायामादीनि च कर्मिण उक्तमेवात्र नाद-

-रणीयं चित्तजयाय प्राणाया . . . .

: . . . मत्रैव पूर्वम् । . . भिरच्चलनं मन

इति । धारणा च कर्मिण उक्तैव नापेक्षणीया ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमन्मृगेन्द्रे :

अयमर्कगुणं कालं कृतचित्तस्यवास्थिति: ।

प्राप्नोति धारणा शब्दं धारणा सिद्धिदानत इत्युक्तम्।

: ज्ञानिनामपि निष्कलस्वरूप धारणाकाल विशेषा-

-देव भविष्यतीति कृत्वा ज्ञानविषयापेक्षणीयैव। किंच।

शिवादि देवताराधन विषये तत्सान्निध्यकरणार्थन्त-

-त्पूजानमस्कारादिकमावश्यं कर्तव्यमेव । *

(व) तथा निष्कलात्माराधनविषये च तदुद्दिश्य पूजादिकम-

-न कर्तव्यमित्याह :

: नात्र पूजा नमस्कारो न जपोध्यानमेव च ।

अत्रेति निष्कलात्मानमुद्दिश्य पूजादिकन्नकुर्या-

-दित्युक्ते शिवमुद्दिश्य नित्यनैमित्तिक पूजादिकं

कर्तव्यमेव ।(तदुक्तं)

ज्ञेयतयोक्तं मुक्तावस्थायां शिवसाम्यरूपं यत्प्रोक्तं

तदेव सदा ध्यातव्यन्तत आत्मा साक्षात्कारो भवति

तदन्यत भूतात्मादिस्वरूपं किञ्चनेति सर्वात्मना

परित्यजेत्। नात्मनो रूपतया ध्यायेदित्यर्थः। आत्म-

-स्वरूपादन्यभूतया भूतात्मादि भावनया पुनर्बन्धो

भवतीत्युच्यते । ...

बहिरहित चित्तानां जायते बन्धहेतव: ।

In Public domain. Digitization Muthulakshmi Research Academy

बहिश्चित्तन्निवार्यैव विन्दन् लोकेन सीदति ।

आत्मनो बहिरङ्गभूत भूतात्मादिष्वात्मभावनां विहाय
परमात्मस्वरूपमेव भावयन् तत्साक्षात्कारेण विन्दन्
लब्ध्वा लोकइति लोकाद्यै न जननं याति । केवलं देहा-
-न्ते शिवसायुज्यमेव गच्छतीति भावः ।

अथ प्रासङ्गिकं परिसमाप्य प्रकृतन्निष्कलस्वरूप-
-भावना प्रकारमाह ।

नात्रकिञ्चित् बहिर्नान्तर्न मध्यन्नाप्यधः क्वचित् ।
सर्वाकार निराकारं स्वसंवेद्यं विराजते ॥

निष्कलस्वरूपस्य स्वात्मन्येवावस्थितत्वादस्मि-
-न्विषये परदेवतादि विषय इव पूजानमस्कारा-
-दिकं कर्तव्यतया यत्किञ्चिदस्ति वा नास्त्येव ।
किञ्च न बहिरिति देहात् बहिर्भाव्यमाने देहान्त-
-र्नास्तीति तस्याव्यापकत्व दोषो भवति । यावद्दे-
-हान्तर्मध्येधश्चवा भावनया दोषो मन्तव्यः । तत-
-स्सर्वाकार निराकारमिति देहादि सर्वाकारो विभु-
-त्वान्निराकारो विभुत्वा स्वस्य रूपं विराजते प्रकाशत
इति संवेद्यं भावनीयम् । अथ निष्कलात्मस्वरूपमेवं
41.a रूपमिति प्रकल्प्य भाव्यमानत्वात् कल्पना कथं
फलवतीत्यत्रोच्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

यद्यदालोक्य यो जन्तुः कुरुते कर्म्मसञ्चयम् ।
तत्नातिर्जायते यस्मान्निरालोकन्तु चिन्तयेत् ॥

यस्मात् दृष्टवद्दृष्टकल्पनेति कृष्यादीनामनन्तरमेव फलावाप्तेर्दृष्टत्वात्तद्वदिति निश्चित्य यो जन्तुरात्मा यद्यदालोक्य यद्यत्स्वर्गादि फलमपेक्ष्य कर्म्मसञ्चयं ज्योतिष्टोमादिकं कुरुते तस्य तदनन्तरन्तत्नातिः । स्वर्गाद्यवाप्तिर्जायत इति निश्चयो भवति । तस्मादत्रापि कर्म्मिणां कल्पनाः फलावाप्तिवत् निष्कल-स्वरूप भावनायाश्च फलावाप्तिनिश्चयमेवेति निरालोकं निष्कलात्मस्वरूपञ्चिन्तयेत् ध्यायेत् ।

ननु कर्म्मत एव मुक्तिरपि तत्र सकामतया कृतस्य भुक्तिर्भविष्यतीति निष्कामतया कृतस्य मुक्तिर्भविष्यतीति ततो कर्म्माण्येवानुष्ठितव्यानि किं ज्ञानानुष्ठानेनेति जैमिनीयाः । तदयुक्तमित्याह ।

हेतुर्न्नास्ति फलन्नास्ति नास्ति कर्म्म स्वभावतः ।
असद्भूतमिदं सर्वं नास्ति लोको न लौकिकः ॥

अथ निष्कामतया कृतं कर्म्म स्वफलत्वेन मुक्तिन्दास्यति वा स्वफलतया वा । तत्र स्वफलरूपत्वेन दास्यति चेत् भोगवत्तत्सुकृतकर्म्मक्षयात्तत्फलरूपा मुक्तिरपि नैव स्यात् । अस्वफलरूपतया चेत् भोगमपि दद्यात् किं भोगैरपराद्धं

In Public domain. Digitization Muthulakshmi Research Academy

को वास्य प्रतिबन्धको वक्तव्यः। अस्तु वा कर्म्मफलस्य नियमेन सुखदुःखरूपत्वात् सा मुक्तिस्सुखरूपा वा दुःखरूपा वोभयरूपा वा। सुखरूपा चेत् सुखसामग्री स्वशरीरञ्च स्त्रीचन्दनादिकञ्चापेक्षते। ततो बन्ध एव स्यात्। दुःखरूपा चेन्नरक एव भवतां मुक्तिः। उभयरूपा चेत् भोगादविशेषोऽस्ति ततो दृष्टवददृष्ट कल्पनेति कृष्यादि-कर्म्म हेत्वादिवत् कामना कर्म्म हेतु शरीरादिकञ्च तत्फल-रूप मुक्तिश्च तत्कर्म्मसंस्कारश्च तदाधारभूलोकश्च तल्लो-के भवभोग्यवस्तूनि च सर्वमसद्भूतमिति नष्टधर्म्मि-स्यादिति तन्मतमुक्तिश्च सृष्टौ संसारी भवतीति तन्मत-न्त्यक्त्वा सत्यरूप निष्कलात्म भावनारूपज्ञानाभ्यास एव कर्तव्य इति। तदुक्तं श्रीमन्मृगेन्द्रे।

यावत्कश्चिन्मुक्तः पाशजन्यास्तावत्तास्सर्वा भेदभा-यान्ति सृष्टाविति। न तु जगत्सर्वमसदिति वेदान्त-वादिन इव व्याख्येयम्। जगतस्सत्वं सत्कार्यवादेन प्रतिपादितत्वात्॥ अथ भावनाया दृढीकरणार्थं पुनश्च निष्कलात्मभावनां प्रकारान्तरेणाह।

निरालम्बमिदं सर्वं निरालम्ब प्रकाशकम्।
निरालम्बमिदं कृत्वा निरालम्बो भविष्यति॥

इदं सर्वमिति प्रकृतत्वात् प्रागुक्तं कर्म्मं च तनुकरण-

In Public domain. Digitization Muthulakshmi Research Academy

-भुवनादिकञ्च सर्वं निरालम्ब - - - - - -

. - - . . - स्यादित्यत्र हेतुः। निरालम्बप्रकाशक-

- -मिति । अनवरतपरिणतिनाशधर्मित्वादेव क्वचित्

कदाचिदपि स्थिरावस्थाभावात् स्वयमेवास्य निरालम्बनत्वं

प्रकाशयति। यस्मात्तस्मात्सर्वं परित्यज्य - - - -

. - - - - - - - द्वैतोत्पन्नत्वात्

तत्पक्षवाच्यस्य स्थिरावस्थासम्भवात् देहाद्यालम्बन-

-रहितमिति निष्कलरूपमात्मस्वरूपमिति । तदेतद्भावनां

कृत्वा निरालम्बो भविष्यति । सर्वबन्धन - - -

- - - - - - - - - बन्धनभावनया

पुनः पुनस्संसारी भवतीति दृष्टान्तेन दृढयति ।

. . व्योमाकारं महाखण्डं व्यापकं यो न भावयेत् ।

संसारी भवेल्लोके बीज - - - - - -

. . - - - - - - .

. . . - . . . . . .

. . . . . जालैः कृत्वा तत्र प्रविश्य तत्कोश-

:1. 6. -मपि निर- -ईरञ्च कृत्वा क्षणमात्रमुप - - -

. . - - - - - - .

. . - - - - - - .

. . . - - - - . त्मस्वरूपं व्यापकत्वादि-

In Public domain. Digitization Muthulakshmi Research Academy

-धर्म्मयुक्तं म.. शून्यं सर्वोपाधिरहितं प.. मात्मानं
परित्यज्य भूत.. . . . .

. . . .

. . . . . भवति । ननु मन्त्रात्मभावनया यो
यत्तत्वे भुवने वा भोगमभिलषति स तत्र महदै.. र्यं सं-
-प्राप्य परमसुखी भवतीति श्रूयते । तत्कथम् । तदुक्तम् ।
. . . . भोगानस्तत्रैव .. योजितः ।
सिद्धिभाङ् मन्त्रसामर्थ्यादिति । तत्रोच्यते ।
सर्वयोनिषु सर्वस्य महत्क्लेशं पुनः पुनः ।
सर्वक्लेशं परित्यक्तुं महाशून्यं विचिन्तयेत् ॥
सत्यम् । तत्तत्वेष . . . .
. . त्यैव तत्र भोगं भुञ्जानस्य पुनर्म्महाप्रळये तत्व-
-प्रळयभयात्सर्वस्य कल्पादिष्वन्ते स्थितस्य महत्क्लेशं
महद्दुःखं भवति । पुनस्सृष्टिकाले च तत्तत्वे भुवने वा
सर्वयोनिषु जननाच्च . . . . । ततस्सर्व..
. . कारि तत्भावनान्त्यक्त्वा महाशून्यमिति श्रुतात्मादि-
-मन्त्रात्मान्तरूपरहितं निष्कळात्मस्वरूपं विचिन्तयेत्
भावयेत् ॥
ननु यद्येवं ज्ञानाभ्यासाद्भवेत् सर्वं महत्क्लेशकारि स्यात्
पूर्वं क्रियाचर्यायोगप.. ग्रन्थेषु प्रोक्तसिद्ध्युपायानां भौतिक-

In Public domain. Digitization Muthulakshmi Research Academy

-दीक्षादीनामानर्थक्य प्रसङ्ग इति तत्र प्रवृत्तिः कस्यापि
न स्यादित्यत्रोच्यते ॥

ज्ञानोत्पत्ति निमित्तन्तु क्रियाचर्या प्रकीर्तिता ॥

नात्र तेषामानर्थक्यता । मन्द मन्द तीव्रशक्ति निपातयुक्ता-
-ना किञ्चित्कालं परभोग भुक्त्यनन्तरञ्ज्ञान मुपस्थते
न सर्वेषामेकदेति मत्वा ज्ञानोत्पत्ति निमित्तमिति ज्ञानो-
त्पत्तेर्निमित्त तथोक्त तीव्रतरशक्ति निपातं यावत् क्रिया-
-चर्यानुष्ठानानान्तफलं भुक्ति सिद्धिश्च तदर्थमेवं मया
प्रोक्तन्तु निरर्थकम् । यदुक्तं श्रीमद्रौरवे ।

दीक्षापूता गणपति गुरोर्मण्डले जन्मवन्त-
-स्सिद्धा मन्त्रैस्तरुण हिमकृन्मण्डलो भासि देहाः ।
भुक्त्वा भोगान् सुचिरममरस्त्री निकायैरुपेता-
-स्स्वस्तोत्कण्ठा हिशवपद पैरैश्वर्यभाजो भवन्ति ॥

तदस्तु योगपादानुष्ठानात् किं फलमित्युच्यते ।

योगं सालम्बनन्त्यक्त्वा निष्प्रपञ्चं विचिन्तयेत् ॥

योगाङ्गेषु प्रत्याहारान्तमङ्गत्रयस्य तदनन्तरं सिद्ध्यपेक्षाया
सालम्बन ध्यान समाध्यभ्यासेन तत्परिसमाप्तिं सन्त्यक्त्वा
निष्प्रपञ्चमिति परमात्म ध्यान समाधिं कुर्यात्तदेव
योगाभ्यास युक्तस्य योगपादानुष्ठानात्प्रयोजनमिति
अथ योगं सालम्बनन्त्यक्त्वेत्युक्तन्तत्र यदर्थ पर्यन्तं सालम्बन-

In Public domain. Digitization Muthulakshmi Research Academy

विषयमित्युच्यते ।

पातालशक्तिपर्यन्तं सर्वमेतदभीप्सितम् ॥

पातालेति सर्वपातालाधोवर्त्ति सूक्ष्मपृथिवीतत्त्वमुच्यते ।
शक्तीति शक्तितत्त्वमूर्ध्नि स्थितं शिवस्य परिग्रहशक्त्या-
-ख्यबिन्दोः प्रथमपरिणतिरूपं शिवतत्त्वमुच्यते ।
ततस्सूक्ष्मपृथिवीमारभ्य शिवतत्त्वपर्यन्त पतत्सर्वमिति
पतत्तत्त्वञ्च तदधिपतिसहितन्तत्त्वं सर्वमपि सालम्बन-
-योगविषयमर्थजातमिति मयाभीप्सितमिति ।

अथ तत्त्यागप्रकारः ।

भग्नं यैश्शब्दशस्त्रेण ते स्मृताश्शब्दवेदिनः ॥

यैरिति सालम्बनयोगाभ्यासेन पातालशक्तिपर्यन्तं साक्षा-
-त्कृत्य पुनस्तत्सर्वमस्त्रेणेति क्षुरिकास्त्रेण भग्नमिति भग्नं
यथा भवति तथा कृत्वा तत्त्वशब्दमिति निष्कलस्वरूपं
विचिन्त्यत इत्यध्याहारः । ते शब्दवेदिन इति निष्कल-
-स्वरूपज्ञानिन स्मृता आगमज्ञैः प्रोक्ताः ।

तदुक्तं श्रीमत्सर्वज्ञानोत्तरे -

तन्मात्रं पश्यते सूक्ष्मं गन्धतन्मात्रमात्मनि ।
रसन्तेजश्च स्पर्शञ्च शब्दतन्मात्रमेव च ॥
पश्यते कर्मयोगेन वर्णभावैः पृथग्विधैः ।
अहंकारं मनो बुद्धिं गुणमव्यक्तपौरुषौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अशिवकानि जानीयात् सधर्मगुणलक्षणात् ।
विद्यां कलान्ततः कालं मायां विद्यान्ततः परम् ॥
कृष्णाङ्कुशमुखास्सर्वान् पुनरस्त्रेण भेदयेत् ।
42.a. विद्येश्वरान्ततस्तत्त्वं तथा सादाशिवं परम् ॥
भित्वा तु क्षुरिकास्त्रेण ततस्सूक्ष्मं विशेदिति ।

अथैवं निरालम्बनयोगाभ्यासो देवमूर्तिं ध्यायेत् सालम्बना-
-भ्यासतस्तस्माद्धि साक्षात्कारः किमर्थं क्रियत इत्यत्रोच्यते ।

विषये लोलुपञ्चित्तं मर्कटादपि चञ्चलम् ।
सर्वशून्यपदे स्थित्वा ततो निर्वाणमेष्यति [illegible] ॥

अयमर्थः । प्रकृत्या चाञ्चल्यशीलयुक्तञ्चित्तं मनो न प्रथमं
निरालम्बने संसक्तं भवति । ततः क्रमेण सालम्बने संसक्तं
कृत्वा कृत्वा चोपायान्निरालम्बने स्थापितव्यम् तस्मात्तद-
-र्थमेव सालम्बनं कर्तव्यमिति न निरर्थकम् । तत
एवं क्रमेण निरालम्बने चित्तं यस्स्थापयति स एवाचि-
-रेण मुक्तो भवतीति । तदुक्तं श्रीमत्कालोत्तरे —

उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्य तान्त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेदिति ॥

ज्ञायते नेनेति ज्ञानं सालम्बनमेव । अथ सर्वशून्यपदे
स्थित्वेत्युक्तम् सामान्येन सर्वशून्यपदत्वं परमात्म-
शिवयोरपि विद्यते । ततः कस्य सर्वशून्यपदं विचिन्त-

In Public domain. Digitization Muthulakshmi Research Academy

-णीयमित्यत्र पूर्वं परमात्मनस्सर्वरूपत्वपदमेवं रूपमिति
चिन्तनीयमिति तत्स्वरूपं लक्षयति ।

सर्वतत्त्वाद्यसंभिन्नं देहात् भिन्नं तथैव च ।
अहमस्मादसंभिन्नं चैतन्यं सर्वतोमुखम् ॥
पाशावलोकनं त्यक्त्वा स्वरूपालोकनं स्थितम् ।
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिस्ततोऽन्यथा ॥

सर्वतत्त्वाद्यसंभिन्नमिति सर्वतत्त्वपदेन तिरोधायिका
शक्ति बिन्दु बैन्दव माया मायेयात्मक तत्त्वजालमुच्यते ।
आदिशब्दात् आणवाख्यो मलः प्रोक्तः तैरसंभिन्नमेतत्
सर्वाभिरिति संश्लेषेण युक्तं भवावस्थायां भोगमोक्षसि-
-द्ध्यर्थं सामान्य विशेष सम्बन्ध युक्तमित्यर्थः । देहात् भिन्न-
-मित्युपलक्षणम् । भूतात्मतत्त्वात्मान्तरात्मजीवात्ममन्त्रा-
-त्मभावात् भिन्नम् । सर्वतोमुखञ्च सर्वत्र सर्वाध्वसु
स्वकर्मभोगार्थमवस्थितं यच्चैतन्यं सर्वज्ञत्व सर्वकर्तृत्वा-
-त्मक शिवत्वयुक्तमात्मस्वरूपमागमेषु श्रूयते । अस्मा-
-दिति तच्चैतन्यादहमिति सर्वत्र ग्राहकरूपेण
दृश्यमानं चैतन्यमसंभिन्नमित्युदितमिति । पाशा-
-वलोकनं त्यक्त्वेति जडात्मस्वरूपभावनां विहाय स्वरूपा-
-लोकनं परमात्मैवाहमिति स्वरूपचिन्तनं यत् सैषा
आत्मव्याप्तिरिति आत्मदर्शनं भवेत् । शिवव्याप्तिस्त-

In Public domain. Digitization Muthulakshmi Research Academy

-तोऽन्यथेति । शिवदर्शनन्तद्भावनासिद्ध्यनन्तरमेतल्लक्षणा-
-न्यथा प्रकारेण सिध्यति । ततश्शिवस्वरूपभावना-
-प्रकारमप्याह -:

आकाशमिव सर्वन्तु सबाह्याभ्यन्तरं प्रिये ।
परानन्दस्वरूपन्तु पश्यन्नानन्दभाग्भवेत् ॥

यो विशुद्धात्मा । सर्वमिति प्रागुक्तवस्तुजातं । सबाह्या-
-भ्यन्तरमिति । अणोरणीयान्महतो महीयान् भूत्वा
वाप्याकाशमिव . . तेषु संसक्तभावेन स्थितमित्यध्या-
-हारः । परानन्दमिति । परमुत्कृष्टमानन्दं ज्ञानक्रिया-
-समृद्धिरूपं शिवस्वरूपं सदा पश्यन् दृष्ट्वा आनन्द-
-भाग्भवेत् इति । सर्वमात्मवशे तोऽपेव सुख ' ' -
- - - - . . गुण्य शिवत्वभाक् भवेदित्यर्थः ।

तदुक्तं श्रीमत्सर्वज्ञानोत्तरे -:

सर्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रतानित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहस्स शिवत्वमेतीति ॥

अथ प्रास ' - - . ' - - - - - - .
. . लक्षणयोः फल . . . . ष्टान्त पूर्वेणोक्तं श्रीम-
-न्निश्वासकारिकासूत्रद्वयं पठति -:

निरिन्धनो यथा वह्निः स्वयमेव प्रशाम्यति ।
ग्राह्याभावान्मनस्तद्वत् स्वयमेव विलीयते ॥

In Public domain. Digitization Muthulakshmi Research Academy

काष्ठे प्र . . . .

. . . . भिति

निष्कळ . . भावना निष्कळ शिवयोगाभ्यासे

42.b. निरालम्बे स्वग्राह्य . . . रूपाकारादेरभावात् । काष्ठा-

ग्निरिव तस्य यो - - - - - -

. . . - - - - - - - .

. . . . . . - - - - .

. . . . र्त्ति तच्चित्तमिति सालम्बन-

-योगाभ्यासेनादौ इत्युपलक्षणम् । नादादिभुवनेषु भोगा-

-भिलाषेण तत्तद्भुवनाभि . . . - .

. . . . . . - . . . .

. . तं काष्ठविषये प्रवर्त्तित वह्निरिव स्वाश्रय भुव-

-न भोगप्रारब्धेण शमनं भवति । रुद्र भोगावसाने

मुक्तिं यातीत्यर्थः । तदुक्तं मोक्षकारिकायाम् ।

प्राप्नु - - . . - . . . . . ।

. . . . गान्ते त . . प्राप्नुयाद्ध्रुवमिति ॥

अथ निरालम्बनयोगाभ्यासिनो भववासनास्सर्वाः

क्रमेण नि न स्युरित्युच्यते ।

मोहिका मूर्च्छिका माया स्वप्नश्चेति चतुर्विधाः ।

सुषुप्तिर्जायते . . - - - .

In Public domain. Digitization Muthulakshmi Research Academy

ति मायामलवासनोच्यते ।

प्रथमन्तां परित्यजेत्। तथाहि शरीरपुत्रदारादि सत्तामायात्मकशरीरादि बन्धनिमित्तका हि ततः प्रथमं मायात्मकतनुकरणादिष्वहमस्मदीयमिति प्रवृत्तां बुद्धिं तन्माया गुणांश्च परित्यजेदित्युक्तं भवति। तत्गुणाश्च सप्तैव । यदुक्तम् ।

अनृतत्वमप्रियत्वमालस्यं बहुभाषणम् ।
द्रोहमात्सर्यपैशुन्यं सप्तैते मायिका गुणा इति ॥

तदनन्तरं मूर्च्छिकेत्याणवाख्य मलवासनोच्यते। तत्परित्यागः कर्तव्यः। मूर्च्छेति मलपर्याय वाचकत्वात् ।
यदुक्तं श्रीमन्मृगेन्द्रे ।

पशुत्व पशुनीहार मृत्युमूर्च्छा मलाञ्जनैः ।
अविद्यावृतिरुग्ग्लानि पापमूलक्षयादिभिः ॥

मल एव समुद्दिष्ट इति । तत्सम्बन्धिनो गुणा मूर्च्छिका । ताश्च सप्तैव ।

मोहो मदश्च रागश्च विषादश्शोष एव च ।
वैचित्र्यं महार्षाख्यश्च सप्तैते सहजा मला इति ॥

तत्गुणनिमित्तवासना बहुविधा श्रीमन्मतङ्गपारमेश्वरे विस्तरेणोक्तास्तत एवावधार्याः। ततो मायेति महा-
-माया गुणवासनोच्यते । तत्परित्यागः कर्तव्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

तद्वासनात्च ऊर्ध्वभुवनेषु भोगाभिलाषदायिका ।
यदुक्तं । विज्ञानकलाः प्रलयाः प्रसिद्धाः कारणेश्वराः ।
एतेषां मोहमूलञ्च महामाया च कारयेदिति ॥
ततः पाठक्रमादर्थक्रमो बलीयानिति न्यायात् जाग्रदादि
भावात्मिका पञ्चावस्था वासना प्रत्याहारादिना क्रमेण
त्याज्या एव । तदुक्तं श्रीमदचिन्त्य विश्वसादाख्ये ।
जाग्रद्दृश्य प्रवृत्तिश्च प्रत्याहारेण शाम्यति ।
धारणा यापयेत्स्वप्नं ध्यानेनैव सुषुप्तिकम् ॥
समाधिना च तुर्यन्तु तुर्यातीतं शिवेन तु इति ।
चतुर्विधमिति मोहिकादि त्रयञ्च जाग्रदाद्यात्मिकावस्था
चेति चतुर्विधञ्च । एतत्सर्वञ्च चशब्दात् कर्म-
-वासनादिकञ्च त्यजेदिति । यदुक्तम् ।
शुद्धञ्च स्नेह मैथुन्यमकृत्यं भावधर्मकम् ।
षड्गुणं काम्यमिति । अवस्थालक्षणं सर्वमस्मा-
-भिस्सिद्धान्तसारावलीवृत्तौ प्रविस्तरेणोक्तमत एवा-
-वधार्यम् । अथ भूतात्माद्यात्मभावात् भिन्न एव
परमात्मेति भावनया तत्स्वरूपं लभत इत्याह ।
देहात्सूक्ष्मगतात्प्राणाच्चित्तात्बुद्धेरहंकृतेः ।
सर्वस्मात् भिन्न एवाहमित्यन्तेवल्लभते चितम् ॥
देहशब्दात् भूतात्मवासनोच्यते । सूक्ष्मगतादिति सूक्ष्म

In Public domain. Digitization Muthulakshmi Research Academy

सूक्ष्मपदेन देहपदमप्यनुवर्तनीयम् । सूक्ष्मदेहगतादि-
-त्यर्थः । तेन तत्वात्मवाचनोच्यते । प्राणादिति । प्राण-
-शब्देन प्राणगमागमाविनाभावसञ्चरणशीलान्तरा-
-त्मवाचनोच्यते । यदुक्तम् ।

हंस हंसेति यो ब्रूयाद्धंसो देवस्सदाशिव इति ।

सर्वस्थादिति स्वपदोपात्तादन्यज्जीवात्ममन्त्रात्मवाचनो-
-च्यते । तत एतत् पञ्चात्मभावादन्योयं परमात्मेति
+3.a भावनीयः । तदुक्तं श्रीमत्सर्वज्ञानोत्तरे —

नास्ति मन्त्रैर्विना किञ्चित् सर्वं स्थावरजङ्गममिति ।

भूतात्मादिलक्षणञ्च तत्रैवोक्तम् ।

भूतात्मा भूतसंयोगात् तत्वात्मा तत्वसंस्थितः ।
मन्त्रात्मा मन्त्रमयो ज्ञेयोऽन्तरात्मा गिरान्वितः ॥
भोक्ता तु सुखदुःखानां प्रकृतिस्थो गुणान्वितः ।
जीवस्तु जीवनस्तेषामेभिर्मुक्तः परस्तु स इति ॥

अथ नैय्यायिकादिमतात्मभावनापि न कार्येत्याह ।

चित्ताद्बुद्ध्यहंकृतेरिति । एतदुपलक्षणम् । गुण-
-चैतनिकादीनाम् । बुद्धिचैतनिका नैयायिकाः क्षणिक-
-वादिनश्च । गुणचैतनिकाः क्षपणकाः । इन्द्रिय-
-चैतनिका मनश्चैतनिका अहंकारचैतनिकाश्च केचित्
भवन्ति ततस्तत्तन्मतात्मभावनायाश्च भिन्न एवायं

In Public domain. Digitization Muthulakshmi Research Academy

परमात्मेति योगकाले तत्सर्वं निरस्य परमात्मभावना-
-भ्यासकृद्योगीन्द्रो लभते चित्तमिति साक्षात् शिवसाम्यरू-
-पात्मा भवति । ननु चात्र योगसमाधिना चैकदात्मभावनां
कुर्वीत नोक्तं पुनःपुनः किमर्थमात्मभावनां कुर्यादित्युक्त-
-मित्यत्र समाधिं वक्ति ।

सकृदभिभूयते चित्तं निद्रया स्मरणादिना ।
बोधयित्वा प्रयत्नेन कुर्यात्स्वस्थं पुनः पुनः ॥

सत्यं चेद्योयमिति वाक्यार्थः प्रत्यक्षसिद्धो भवति तदात्र न
पुनश्चरणम् । परमात्मबोधौ तु चित्तमिति शिवशक्त्या-
-धिष्ठितात्मा चिद्भक्तियोगकाले मनात्मा शिवयोरैक्यभावना-
-त्मानं प्रत्यक्षीकरोति न सर्वदा । ततो यदा शिवयोग-
-विरामो भवति तदा संसारवासनया भोगविषयस्मरणादि-
-नाचादिग्रहणदुःखत्रयेण परित्यागार्थार्जनप्रवृत्त्या च ।
निद्रयेत्युपलक्षणमाहारनिद्राभयमैथुनादिभिश्चाभिभूताचा-
-क्रमिता भवति किल ततस्सदात्मसाक्षात्कारो न भवेदिति
तदर्थं पुनः पुनश्शिवयोगेनाति प्रयत्नेन बोधयित्वा
साक्षात्कृत्य साक्षात्कृत्य यथा स्वस्थं स्वनिष्ठं भवति
तावत् भावनां कुर्यादिति पुनश्चरणमुक्तमिति । एवमि-
-यल्लक्षणयोगाभ्यासेन शिवाद्वैतभावनासिद्धिलक्षण-
-मिदमेवेत्युच्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

यद्वा स्थिरं भवेच्चित्तं नैव चाल्यं कथञ्चन ।
न किञ्चिच्चिन्तयेत्तत्र स्थिरमेव तु कारयेत् ॥

एवं पुनश्चाभ्यासे कृते यद्वेति यावति काले चित्तं शिव-तत्त्वाधिष्ठितमित्यात्म निवृत्तिः । कथञ्चनेति । अणि-माद्यैसिद्धिविषयैर्येन केन प्रकारेण । चलनं कृतेपि चाल्य-मिति चलनशीलवत्तो नैव भवति तदा शिवतत्त्वैकनिष्ठतां प्राप्नोति कृत्वा न किञ्चिच्चिन्तयेदिति । तच्चलनहेतुकं चिन्तनं किंचिदपि नैव कार्यम् । तत्रेति शिवयोगसिद्ध्य-नन्तरं किं करणीयमिति चेत् । स्थिर · · कारयेदिति । स्थिरत्वकहेतु शिवाद्वैत भावनामात्रं सदाकार्यमिति । तथाहि । किञ्च ।

आश्रयालम्बनञ्चित्तं तत्कुर्यान्निराश्रयम् ।
चञ्चलं निश्चलं कृत्वा निश्चलं न तु चाल · · ॥

स्वभाव चञ्चलधर्म · · · · हिना निश्चलं कृत्वे-ति · · · हृत्य तदाश्रयालम्बन · · त्वा प्रथमं भूत-धारणा सालम्बनं योगं कृत्वा प्रत्यक्षीकृत्य तत्सिद्ध्यनन्तरं तन्मात्राधारणात्मकं कृत्वा · · · तैवं शिवतत्त्व · ·
· · · · · · प्रत्यक्षीकृत्वा यदि · · प्रत्यक्षी-कृतं तत्सर्वं मम · · यन्न भवतीति त्यक्त्वा निरालम्बन-योगेन निश्चलं · · · निष्ठं कुर्यात् । करोति स पुनः

In Public domain. Digitization Muthulakshmi Research Academy

कथं सालम्बनादिना चालये . . . . - . .

. . - . - . - . - . - . -

. . . - - . . - . .

. . . . . णोच्यते ।

सर्वभूतलये जाते . . . . हनिर्म्मल . . ,

343-6. तद्व . . , ... - -

, . - . - . - - . .

, - - . , - - . .

. . . . . रुच्यते । तदेव प्रपञ्चयति । अत्र

अत्र च . . हत्वात्मा . . सवच्चित्सुनिर्म्मलम् ॥

अत्र योग . . सा . बाध . वारको . ल . . - - .

. . - . - - - न सत्याकार . - -

. . भवतीति भावनीयम् । ननु सांख्योक्तवेद । .

. र्नादि निर्म्मलो भवतीति व्याख्येयम् ।

तस्यानादि . . . . बोक्तत्वात् । अनादि . - .

. . . . लम्बनयोगात्मन . . सनाप्रकारं

सप्रपञ्चम् . पसंहरन्नाह ।

शिवतत्त्वगुणाबोढ हिरण्यधर्म्मावलोकनम् ।

तदेव जन्मसाफल्यं पाण्डित्यमिदमेव हि ॥

शिवतत्त्व . . . स्सर्वज्ञता तृप्त्यनादिबोध . . .

In Public domain. Digitization Muthulakshmi Research Academy

...... शक्तिरनन्तशक्तिरिति षड् भेदाः। तेषामाद्य-
-शिवशक्त्या प्रकटीकृतकाले ध्वस्तव्यापारे प्रवृत्तत्व-
-त्तत्र सर्वज्ञतायाः प्रवृत्तिः। शिवशक्त्युपादाननिमित्त-
फलक्रियाभिस्सदावलोकनं तास्तत्रशक्त्या वामाद्या-
.. त्मानं बिन्दुमाया. तत्कार्याणि च निमित्तं कर्म-
-फलमात्मनां भोगमोक्षौ क्रिया पञ्चकृत्यं एतत्समस्तं
भूतो भावि च वर्तमानञ्च यथास्थितं गृह्णातीति मुक्ता-
-त्मानस्सर्वज्ञा एव तेषां भाव स्सर्वज्ञता।

तदुक्तं मोक्षकारिकायाम्।

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ।
शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मा गतावृतिरिति।

अनन्तादिष्वपि विद्यते मुक्तात्मनां को विशेष इति चेत्।
मुक्तास्त्वीषिधर्मयुक्तसर्वज्ञानत्वनन्तादयः। तेषां शिवं
प्राति न्यूनकर्तृत्वात् शिवप्रेरणया पञ्चकृत्यकारि-
-त्वाच्चाल्पत सर्वज्ञा एव। तत्राप्यणुसदाशिवादीनां
तत्तिरप्यस्तीति चेदनादि बोधा इति मुक्तात्मानस्त्व-
-नादेर्विद्यमान शिवशक्त्या प्रकटीकृतो बोधो येषामि-
-त्यनादिबोधाः। न त्वणुसदाशिवादयः। तेषां बैन्दव-
-शरीरात् प्रकटीकृतबोधत्वान्न्यूनत्वमा एवेति ज्ञान-
-शक्तिभेदस्त्रिविधः प्रोक्तः। अथ क्रियाशक्तिभेदस्त्रि-

In Public domain. Digitization Muthulakshmi Research Academy

-विधा उच्यते । सर्वकर्तृत्वधर्मयुक्ता अपि मुक्तात्मा-
-नो न तु शिवप्रेर्याः स्वतन्त्रा एव । किञ्च मुक्तात्म-
-नां बहुत्वात्तेषां सत्तया योगिनां शैकरिव तेषां शक्तिरन-
-भिभवा क्रियाशक्तिर्येषामिति अलुप्तशक्तय एव ।
तदुक्तं मोक्षकारिकायाम् ।

अभिव्यक्तिकरी शैवी शक्तिस्तत्सन्निधानताम् ।
धाता सततमित्यस्मादपि सिद्धौ न नश्यतीति ॥

ज्ञानशक्तेर्लोप सामग्र्यभावात् क्रियाशक्तेरेवालुप्तेति
मन्तव्या । किञ्च । अनन्तशक्तिरिति शिवसमान-
-धर्मयुक्तत्वाच्छिववदनन्तक्रियाकार्यशक्तियुक्ता एव ।
मुक्ताः । ज्ञानशक्तिरनन्त्यं ज्ञेयानन्त्यात् सिद्धत्वादिति
मन्तव्यम् । यद्येवं शिवस्य षाड्गुण्यात् को विशेष इति चेत्
तस्य षाड्गुण्यस्य विशेष श्रीमन्निश्वास कारिकायामुक्त
एव । तद्यथा ।

सर्वज्ञादि गुणादेव गीयन्ते सर्वतः शिवे ।
तदहं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥

ईश्वरः ।

पशुं पाशांस्तथा तत्त्वान्यध्वभवं प्रच्छयन्तथा ।
सर्वज्ञानादि देवेशि सर्वज्ञस्तेन चोच्यते ॥
सर्वैश्वर्यसुसम्पूर्णस्सर्वाश्रयनिराश्रयः ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वगः परिपूर्णश्च परितृप्तस्स उच्यते ॥
अनादित्वात् स्वभावाच्च सर्वात्मा गूढगोचरः ।
स्वशक्त्या बोधयेद्यस्मात्तस्मात्बोधः प्रकीर्तितः ॥
उत्पादयेज्जगत्कृत्स्नं त्रैलोक्यं सचराचरम् ।
स्थितिं नाशञ्च देवेशि स्वतन्त्रस्तेन चोच्यते ॥
नित्यत्वादजडत्वाच्च सर्वज्ञत्वाच्च शंकरः ।
नौ। योगैरव्याहतत्वाच्च " लुप्तस्तेन चोच्यते ॥
अनादिमध्यनिधनमनपरं वेत्ति कश्चन ।
शक्तेरव्याहतत्वाच्चानन्तशक्तिस्स उच्यते इति ॥

344. a. किञ्च । शि..लयावलोकनमिति शिवभक्तनिषेवण-शिवालयसेवन शिवाश्रममठ शिवालयादि निर्म्मापक-तत्तद्युक्त परिपालनादिकं शिवधर्म्मस्तस्यावलोकनन्तत्पालनम् । तदुक्तं शिवज्ञानबोधे ।

कुलये प्राप्य ततस्तेषां भ..द्रूपं शिवालयमिति ।

श्रीमत्सर्वज्ञानोत्तरेपि ..

यो यत्राश्रमे तिष्ठन् प्राप्तो दीक्षां शिवात्मिकाम् ।
स तत्रैव च सन्तिष्ठन् शिवधर्म्मञ्च पालयेदिति ॥

एवं श्रुतशिवतत्वगुणादेश्च शिवधर्म्मावलोकनञ्च यस्य पुरुषस्य यज्जन्मनि वर्त्तते तदेव जन्मसाफल्यमिति । पुरुषार्थसिद्धियुक्तं भवति । किञ्च ।

In Public domain. Digitization Muthulakshmi Research Academy

पाण्डित्यं सर्वशास्त्रावलोकपण्डितभावञ्च इत्येवेति तदुभययुक्त शिवतत्व गुणाभोक्ता जीवन्मुक्तिदशायामपि भवत्येव तदुक्तं रत्नत्रये –

अनेनैव शरीरेण परं व्याप्तिमखण्डिताम् ।
प्राप्नुवन्तीति । त्वमेव तस्य सर्वशास्त्रोक्त भोगमोक्ष सिद्धि-
-मत्वादिति भावः । अथ चित्तजयश्च स्वरूप भावनया च प्रत्यहं सावधानेन कर्त्तव्य इति पूर्वोक्तमेवानुवदति ।

चलत्वाद्वायुसम्भिन्नचित्तं निश्चलतां व्रजेत् ।
नैवोर्ध्वं धारयेच्चित्तं न मध्यं नाप्यधः क्वचित् ॥
भवतभाव विनिर्म्मुक्तं सदा कुर्यान्निराश्रयम् ।

अथ सदा कुर्यान्निराश्रयमित्युक्तं तत्कथं भवतीत्यत्र कर्त्तव्यमुपायमाह ।

निद्रायां बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
पक्षद्वय परित्यागे सम्प्राप्ते नैव चालयेत् ॥
निराश्रयं सदा चित्तं सर्वालम्बन वर्जितम् ।

निद्रावस्थायां प्राप्तायां सत्यां बोधयेच्चित्तमिति सालम्बन धारणादिना मनोवधानैकनिष्ठं यथा भवति तथा कुर्यात् । विक्षिप्तं शमयेदिति जाग्रावस्थायां विषयेषु पतितञ्चित्तं यदा भवति तदा शमयेदिति प्रत्याहारेण तत्र नादरणीयं कुर्यात् । एवञ्चित्तजयेन

In Public domain. Digitization Muthulakshmi Research Academy

विषयाग्रहणग्रहणपक्षद्वये परित्यागे कृते सति निराश्रयं स्वलीनावस्थां प्राप्तञ्चित्तं सदा सर्वालम्बनवर्जितं निष्कलस्वरूपनिष्ठं यथा भवति तथा कुर्यादिति शेषः। नैव चालयेदिति निद्रादिना चलनं न कुर्यादिति ।

तत्समाधिलक्षणमुच्यते ।

मनोवस्थाविनिर्मुक्तं विज्ञेयं मुक्तिलक्षणम् ।

सदाभ्यासबलान्मनोवस्थाविनिर्मुक्तं ध्यानानवभासनं विज्ञेयमिति केवलं ज्ञेयस्वरूपमात्रावभासनं समाधिस्तत्समाधिर्यदा भवति तदैव मुक्तिलक्षणमिति सर्वबन्धक्षयलाञ्छनं तस्य भवत्येवेति । यदाह पतञ्जलिः। प्रत्ययैकतानता ध्यानं तदेव स्वरूपशून्यमिव समाधिरिति।

उक्तार्थमुपसंहर्तुमाह ।

सर्वालम्बनशून्यञ्च धारयित्वा मनो हृदि ।

यज्ज्ञानं जायते स्पष्टं तदभ्यासपरो भवेत् ॥

मनो हृदि । मनश्शब्देनात्रात्मोच्यते । हृच्छब्देन चिच्छक्तिरुच्यते। यस्यात्मनश्शिवशब्दोद्दीपितशुद्धहृदये सर्वालम्बनशून्यमिति निष्कलस्वरूपं भावयित्वा। भावयित्वा भावनाभ्यासबलात् यज्ज्ञानमिति यत्स्वरूपज्ञानं स्पष्टं जायते स्फुटमवभासते । तदेवाभ्यासपरो भवेदिति स्वात्मसाक्षात्कारसमाधिस्तदेव भवति ।

In Public domain. Digitization Muthulakshmi Research Academy

तदुक्तं सर्वज्ञानोत्तरे

आत्म . . . . लाभः क्वचिदन्यो न विद्यत इति ।

अथ तत्फलं पूर्वमेवोक्तन्तथापि तत् फलनिर्विघ्नमेवावस्था-न्तरश्च भवतीति वक्तुं पुनरप्युच्यते ।

ये . . . . . . निष्कलन्निरवस्थितम् ।

ते यान्ति प . . स्थानञ्जन्ममृत्युविवर्जितम् ॥

अथ . . . . साधैः परमात्मयोगसमाधेश्च फलं शिवसायुज्यमेव न पुनरावृत्तिः। तदन्ययोगसामर्थ्यादि-

-धर्म्मश्च . . लभ्य . . . . .

. . . दैव्यस्तथान्यान्ये . . . . तत्फलम् ।

आस्थयाश्रयि . . . .

. . . . यः ।

दैव्यः इमा यन्तास्थितान्ताः । धर्म्माधर्म्म . . . .

. . . .

. . . .

. . . .

345.b. . . इकञ्च तत्फलमित्येतेषां स . . . . .

. . . .

. . . .

. . . .

.

.

In Public domain. Digitization Muthulakshmi Research Academy

तत्फलमन्य पुनरावृत्ति हेतुत्वात् बन्धनमिति . . . ण्यइति

. . . .

. . . .

. . . . . . भेदमायान्ति सृष्टौ । शैवे सिद्धे

भाति मुद्धर्नीतरेषामिति । तत्रैव माद्वि द्वन्द्व भावनां वि-

-हाय . . . . . विनामुक्तस्सन् सदाशिवध्या कनिष्ठो

योगी तच्छरीरान्त . . . . मुक्तिं याती त्युच्यते ।

आश्रयो द्वन्द्वमित्युक्तं द्वन्द्व त्यागात् परोदय: ।

जीवन्मुक्तस्सदा योगी देहत्यागाद्विमुच्यते ॥

अथैतच्छरीरान्ते साक्षात्परामुक्तिर्भविष्यतीति चेत् किमर्थ-

-न्तच्छरीरणमिति मत्वा हत . . . तदा इत्युच्यते ।

वैराग्येण वपुस्त्यागो नैव कार्यो मनीषिणा ।

आरम्भतः क्रियानाशे स्वयमेव भवत्स्यते ॥

इत्येवं प्रसङ्गात् प्रसक्तोक्तिमुपसंहृत्य प्रकृतं परमात्मस्वरूप-

-भावना प्रकारमुच्यते ।

हृत्सरोजेऽहमयं रूपा याचितिर्निर्मलाचला ।

अहंकारपरित्यागात्साचितिर्मोक्षदायिनी ॥

हृदय कमल कर्णिका मध्ये हंप्रत्ययावच्छिन्ना याचिति

वर्त्तते साचितिर्मोक्षदायिनी भवति कस्मादिति चेत् ।

अहंकारपरित्यागादिति हेतुः । दीक्षोत्तरं भूतात्मादिष्व-

In Public domain. Digitization Muthulakshmi Research Academy

-हमिति भावनां विहाय निर्म्मलामलादि बन्धरहिता-
-चलादि विशुद्धादि धर्म्मयुक्तः सैवाहमिति भावाभ्यासयुक्त-
-श्चेतस्य तच्चैतन्यमेव बन्धरहितं भवतीति कृत्वा मोक्षा-
-यायितीत्युपन्यस्यते । किञ्च ।

सर्वोपाधि विनिर्म्मुक्तं चिद्रूपं यन्निरन्तरम् ।
तच्छिवोहमिति ध्यात्वा सर्वासक्तिं विवर्जयेत् ॥

मोक्षदशायां सर्वोपाधि विनिर्म्मुक्तं शिववत्सर्वेभ्यो
मलात्मादिभ्य उपाधिभ्यो विनिर्म्मुक्तं निरन्तरं विशुद्धा-
-दि धर्म्मयुक्तं यच्चैतन्यं परमात्माख्यं वर्तते तच्छिवो-
-हमिति तत्सुक्त शिवोहमिति ध्यात्वा सर्वासक्तिं विवर्जयेत् ।
प्रारब्ध कर्म्माक्षिप्त मलादि पाशबन्धं समस्तं व्यपोहेदिति ।
अत्र च शिवादि शब्दवाच्येन तव मोक्षदशायां स्वरूपमुच्यते ।
तेन च स्वरूपेण सह बन्धदशायां परिदृश्यमानस्यात्म-
-स्वरूपस्यैक्यमनेन प्रकरणेन प्रतिपाद्यते । ननु परम-
-शिवेन सहात्मन ऐक्यमात्माद्वैतं वा नेव साध्यते । तस्य
सर्व सिद्धान्तागम विरोधात् प्राक्तन समस्त प्रकरण विरो-
-धात्सपासिद्धान्तायुक्ति विरोधादनन्तर प्रकरणे न पत्यादि-
-पदार्थभेदस्य साधितत्वाच्च । तथा हि ।
सर्व संहितासु पत्यादि पदार्थभेदस्तेषामुपास्योपासकादि-
-भेदस्तदैक्य निरासश्च दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमत्सर्वज्ञानोत्तरे :-

सर्वेष्वेव हि शास्त्रेषु ज्ञेयं वस्तु चतुष्टयमिति ।

तत्प्रथम पटलेपि पदार्थानेक सम्पूर्णमिति ।

श्रीमन्मृगेन्द्रेपि :- त्रिपदार्थञ्चतुष्पादमिति । पत्यादि

पदार्थत्रयमुक्त्वा पाशपदार्थस्यावान्तर भेदो दर्शितः ।

प्रावृतीशबलं कर्म्म मायाकार्यञ्चतुर्विधम् ।

पाशजालं समासेनेति ।

श्रीमत्पराख्येच ।

पशुः प्राणीश्वरो विद्या यानिर्म्मुक्तिरिहान्तिमा । इति पदा-
-र्थ भेदो दर्शितः । एवमन्येष्वपि तन्त्रेषु द्रष्टव्यम् । आत्म-
-नानात्वञ्च तदेकत्वे प्रत्यक्षविरोधात् भोगसाम्यादि दोष-
प्रसङ्गाच्च । सर्वेष्वपि शास्त्रेषु सर्वैश्च रामकण्ठादिभिरा-
-चार्यैर्विस्तरेण दर्शितमिति नात्र ग्रन्थविस्तरभयाल्लिख्यते ।

उक्तं हि श्रीमन्मृगेन्द्रे :-

वेदान्तेष्वेक एवात्मा चिदचिद्व्यक्तिलक्षितः ।

३४५.a. प्रतिज्ञामा . . . वे . . . . बन्धनः ॥

अथ प्रमाणतन्त्रात्मा प . . . . . प्रतिपद्यते ।

यत्रैतदुभयं तत्र चतुष्टयमपि स्थितम् ॥

अद्वैतहानिरेवं स्यान्निष्प्रमाणकतान्यथा ।

भोगसाम्यविमोक्षौ च यौ नेष्टावात्मवादिभिः इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमत्पराख्येपि

चिद्रूपत्वात्तदेकत्वं तद्भेदो भिन्नभोगतः ।
न चैकस्य कर्मबोधस्मा विद्या बन्धलक्षणा ॥
तद्भेदिका भवेद्विद्या द्वयमस्त्येकतान च ।
विद्याविद्याविभागेन गतो द्वैतपरिग्रह इति ॥

एवं वेदेषु पुराणेतिहासादिषु भेदप्रतिपादिका श्रुतयो नु-
-सन्धातव्याः । शिवाद्वैतपक्षस्यात्यन्तमनुपपन्नत्वात्
सकलसंहितासु श्रूयमाणस्य पत्यादिभेदस्यानुष्ठानभेदस्य
भोगमोक्षसाधनकलापस्य चानर्थक्यप्रसङ्गादनन्तरप्रदर्शित-
-श्रुतिविरोधाच्च । न च सर्वागमेष्वप्रकाशितमर्थमस्मि-
-न्नुत्तरे प्रतिपाद्यत इति वक्तुं पूर्वप्रकरणविरोधाद्य-
-युक्तम् । न चैकश्रुत्यनुरोधेनानेकश्रुतीनामन्यथाकरणमुप-
-पद्यते । यदाहुः । त्यजेदेकं कुलस्यार्थमिति । ततश्च
प्रागुक्तमेव व्याख्यानं न्याय्यम् ।

अथ शरीरयोगीति बन्धनत्वादस्य देहजातिवर्णाश्रमादि
सम्बन्धस्य तान् देहादीन् भावान्परित्यज्य आत्मनः पृथ-
-ग्भूतान् ध्यात्वा स्वकीयमेव भावमात्मनः पारमार्थिकं
स्वरूपं भावयेदित्याह ।

देहजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान् ।
भावानेतान्परित्यज्य स्वरूपं भावयेत् बुधः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्र युक्तिमाह ।

अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं तन्न पश्यामि यो मम ॥

ममेत्यभिमानितुं योग्येषु तनुकरणादिषु पदार्थेषु यः पदार्थो भुक्तिमुक्तिदशायां सर्वत्र मयासहानुवर्त्तनान्ममा-यमित्यभिमानितुं योग्यं स्यात्तं पदार्थं सर्वत्र न पश्यामि । ततोहमेवैकः कश्चिदपि मे पदार्थो नास्ति सर्वं शिवस्यैव। आहोस्वित् । अहं वा मुक्तिदशायां यस्य पुरुषस्य सम्बन्धी स्वस्वामिसम्बन्धादन्यत्तोहमन्यरितुं योग्य इति चिन्त्यमाने तमपि पुरुषं सर्वत्र न पश्यामि स्वतन्त्रधर्मयुक्तत्वात्ततोहं न कस्यचिदन्यस्य पदार्थः । ततो मम देशकात्यादि सम्बन्धः कस्मादिति युक्तपूर्वमेव मत्वा त्यजेदिति भावः। अथ · · भावयेदित्युच्यते ।

अहमेव परं ब्रह्म जगन्नाथोहमीश्वरः ।
इति स्यान्निश्चितो मुक्तो बन्धस्यादन्यथा पुमान् ॥

परमुक्त्यवस्थायां परमशिवेनापृथक्त्वं बृंहणत्वादह-मेव परब्रह्मेति च। यद्वान्याहं विशिष्टपुण्यवशात् ब्रह्मा-दिपदं शिवकृपागतस्तदाहमेव जगतो लोकत्रयस्य कर्त्ते-ति च। यद्वा दीक्षादिना · · · त्वे योजितो भवेत्तदा मन्त्रे-श्वरसमानशक्तित्वादहमेवेश्वर इति च सर्वधर्मसम-

In Public domain. Digitization Muthulakshmi Research Academy

-त्वमात्मनो निश्चित्य य स्वरूपं भावयति स एव मुक्तो नान्य एवेति । किञ्च ।

अशरीरं यदात्मानं पश्यति ज्ञानचक्षुषा ।
तदा भवति शान्तात्मा स . . . . . हः ॥

यदि शिवशक्त्या प्रकटीकृत स्वचिच्चक्षुषा देहादिभ्यो भिन्न-
-मात्मानं भावयति तदैव मुक्तो भवतीति निश्चयेन कालव्यत्य-
-यः। पुनरपि भावनामेवोपदिशति ।

योसौ सर्वेषु शास्त्रेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो ह्यात्मा सोहमस्मि न संशयः ॥

योसौ सर्वेषु सिद्धान्तशास्त्रेषु ईश्वर इति सर्वज्ञानक्रियासाम-
-र्थ्य युक्तत्वेन सर्वाधिष्ठातृशक्तिमान्नित्य . . . . . .
. . ते स एवाहमस्मि न तु परके ——— शब्दवाच्य शिव-
-व इति भावः ।

. . . .

. . . . पपत्तिमाह ।

विज्ञाति मात्रोपि सदा . . . . स्सर्व . . . . सततं
विमुक्त . . . .

. . . .

. . . .

. . . .

345. 6 सद्रा · - ——— · ब्रह्मणो · · · - · - · - · -

· · - · · - · - · -

· · - · - · - · -

· · - · - · - · -

हेय · इ तत्वं ब्रह्मणो लक्षणम् । अहमपि नोहेयहेयो ·

· · - - - - - · तत्त्व · - - - · · ब्रह्मणो लक्षणम् ।

· - · - · - · - · -

· - · - · - · - · ·

किञ्च । सद्रा विशोकत्वं हि ब्रह्मणो लक्षणमहमपि परमुक्तौ सदाह्लाद स्वरूपत्वाद्विशे · · · भवति । तस्मादहमपि परब्र · · · भवतीति युक्तियुक्ततया भाव · - - - ·

· · शुद्धस्तु जीवन्मुक्त्यवस्थायां कथं भवतीति तत्रोपपत्तिमाह ।

आमस्तकं पादतलावसानं
सान्तर्बहिश्चर्मपटावनद्धम् ।
तत्कृत्स्नमेवामृतरूपमन्य-
-च्चिद्रूपमात्मानमनन्यसिद्धम् ॥

शिरआरभ्य पादान्तमिदं शरीरं · · · द्धमित्युपलक्ष-णमन्यवसरक्तादिधातुभिर्बद्धमतस्माच्चिद्रूपमात्मानं प्रति तत्सर्वमन्यजडरूपन्तथापि शुद्धात्मनानन्यसिद्धं भवति

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्यव्यापकतयेति कृत्वा सान्तर्बहिश्च तत्कृत्स्नममृतरूप-
-मेव मन्ये ततो विरुद्धत्वा . . . . तौ च ब्रह्ममय माव भवतीति।
अथ भावनादृढी करणार्थं पुनः पुनश्चोक्त भावनाञ्च विशेष-
-भावनाञ्चाह।

ईशोऽहमेवास्य चराचरस्य पिता माता च पितामहश्च।
ध्यानं समास्थाय पदञ्चतुर्थं ध्यायन्ति मामेव विमुक्तिकामाः॥

चरस्यत्य- ईशोऽहमेवास्य चराचरस्य अगन्नाथोऽहमीश्वर इत्यत्रोक्तव
व्याख्या। चराचरस्येति पुनश्चानुवर्तनीयम् चराचर-
-स्य पिता च माता च पितामहश्चेति संसारावस्थायां सर्व-
-योनिषु कर्मवशात् पुनः पुनश्च जातः किलोऽहं तस्मात्
क्वचिज्जन्मनि कस्यचित्पिता भवति क्वचित् कस्यचित्
माता भवति। क्वचित्कस्यचित् पितामहो भवतीत्युपलक्षणम्।
पुत्रादिश्च कस्यचित् भवतीति भावनीयम्।

किञ्च मामेवेति। परमात्मतत्त्वं च सायुज्यपदस्य चा-
-नन्यभूतत्वात् परमात्मस्वरूपोऽहमेव सायुज्यपदं भवामि
ततो लोके विमुक्तिकामास्सायुज्यपदप्राप्तिकामा मामेव
पदञ्चतुर्थमिति सालोक्यादिगणनया सायुज्यपदमिति
समास्थाय निश्चित्य मामेव ध्यायन्तीति च भावनीयम्।
परमात्मनो महत्त्वमपि विदित्वा भावनीयमित्याह।

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मादिभिर्देवमनुष्यनागै-
-र्गन्धर्वयक्षाप्सरसां गणैश्च ।
यज्ञैरनेकैरहमेव पूज्यो
मामेव सर्वे प्रतिपूजयन्ति ॥
तपोभिरुग्रैर्विविधैश्च दानै-
र्मामेव सर्वे प्रति पूजयन्ति ।

ब्रह्मादिभिरधिकारिगणैश्च देवमनुष्यनागैरिति तत्तद्भुव-
-नवासिभिश्च । गन्धर्वयक्षाप्सरसां गणैरिति तत्तद्भुवन-
-वासिदेवजातिभेदैश्च । यज्ञैरनेकैरित्युपलक्षणम् ।
यज्ञादिसत्कर्मभिश्च । तपोभिः पञ्चाग्निमध्यस्थित्या-
-दिभिश्च । दानैः कपिलादिदानैश्च । मां प्रतीति परमात्म-
-पदं प्रति सर्वे मुमुक्षवः परमेश्वरं पूजयन्तीति च भावनीयम् ।
किञ्च । भूतानि चाहं स्थिरजङ्गमानि
यावन्ति चान्यान्यहमेव तानि ।
भूतानीत्युपलक्षणम् । पृथिव्यादिशिवान्ततत्त्वानि च
तत्र स्थित स्थावरजङ्गमरूपसप्तविधयोनिभेदश्च । अन्या-
-नीति बिन्दुमायादिकञ्च परमात्मावस्थायान्तत्सर्वं
व्याप्य स्थितत्वादहमेव तत्सर्वमिति च भावनीयम् ।
अथ वर्जनीयभावनाञ्च विहितभावनाञ्च विभज्योच्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

न स्थूल सूक्ष्मो न च शून्यरूपो
ज्ञानैकरूपो जगदेकबन्धुः ।
निरन्तरो निर्मल ईश्वरोहं
स्वप्नाद्यवस्थाच्युति निष्प्रपञ्चः ॥

भूत चैतन्यिकानामिव स्थूलोहमिति च । अन्तःकरणचैत-न्यिकानामिव सूक्ष्मोहमिति चल दीपनिर्वाणवादिनामिव

3+6. a . . . . . . त्वमिति च न भावनीयम् । किन्तु ज्ञानैकरूप इति चैतन्यमात्रमिति च जगदेकबन्धुरिति जगतां जन्मव-द्भाजां चक्राणामेकबन्धुश्शिववत् परमात्माहमिति च । निरन्तर इति परिपूर्णोहमिति . . . . . द्विपाश-रहितोहमिति च । ईश्वर इति शक्तत्वात् सर्वकर्ताहमिति च । स्वप्नाद्यवस्थाच्युतिरिति जाग्रदाद्यवस्थागमा-गमरहितोहमिति च । छान्दसो विसर्जनीयलोपः । निष्प्रपञ्च इति बिन्दुमायापरिणति . . करूपरहितोह-मिति च । अथवा स्वप्नाद्यवस्थाच्युतिश्च निष्प्रपञ्चश्च यस्य स इति व्याख्येयम् । परमात्म समष्टि रूप भावने-यमिति संहृत्योच्यते ।

अनादि विज्ञानमजं पुराणं गुहाशयं निष्कलमप्रपञ्चम् ।
निरञ्जनं निष्कृतिमन्निरीशमदृश्यमग्राह्यमचिन्त्यरूपम् ॥
सनातनं ब्रह्म निरन्तरं यत् पदे पदे सोहमिति प्रपद्येत ।

In Public domain. Digitization Muthulakshmi Research Academy

अनादि नित्यम्। अनादित्वं बिन्दुमायादिषु च वर्त्तते
ततो विज्ञानमिति विशेषितम्। तत्पश्चात्मनि विद्यते
ततो अमिति विशेषितम्। पुनर्जन्मरहित इत्यर्थः।
परमुक्तेर्मलादि० यपोहनेन प्राप्तत्वान्नवत्वं स्यादिति
विशेषितम्। पुराणमिति। अनादिसिद्धमेव शिवमि-
-त्यर्थः। ननु विज्ञानकेवलिनां महामायाधो भागे स्थितत्वा-
-त् विद्याकलानां मन्त्रादीनान्तन्मध्यवर्तित्वात् परमुक्तानां
कुत्र स्थितिरित्यत्रोच्यते। गुहाशयमिति। गुहाख्यस्य
कुण्डलिन्या ऊर्ध्वेशे ⋯ स्थित इति गुहाशय इत्यर्थः।
परमात्मनः परमशिवसमान धर्मत्वात्तद्वत् सकलादि-
-भेदोस्ति वा नास्त्येवेति निष्कलमिति। सदा निष्कल-
-त्वमेवेत्यर्थः। ननु महाप्रलयावसाने सर्वेषां वेदान्तादि-
-मतमुक्तिभाजां पुन ⋯ क्तित्वात् शैवसिद्धान्तमुक्ति-
-भाजां का वार्त्तेत्यत्रोच्यते। अप्रपञ्चमिति। तेषान्नैव
पुनरावृत्तिरित्यर्थः। सर्वेषां कालानलाद्यनाश्रितान्त भुवन-
-गता परमुक्तानामधिकारमलादि सत्भावात् परमुक्तानान्तद्
⋯ नास्तीति निरञ्जनमिति विशेषितम्। सर्वाञ्जनविनि-
-र्मुक्तमित्यर्थः। परमशिवस्य सकलाकलसकलादि प्रतिमा
पूजाध्यानार्थं वर्त्तते तत्समानधर्मित्वात् परमात्मनस्सैवा-
स्ति वा नास्तीति विशेषितन्निष्प्रतिममिति। प्रतिमाश

In Public domain. Digitization Muthulakshmi Research Academy

... जा रहित इत्यर्थः। ननु परमशिवस्य सर्वेश्वरत्वात् परमात्मापि तद्वायत्तो भवति वा। न भवतीति विशेषित -निरीशमिति। ननु तदीशोऽस्ति परमशिव इत्यर्थः।

तदुक्तं श्रीमन्मृगेन्द्रे -:

परमेशानालीहितस्सर्वदास्ते इति।

ननु परमात्मलक्षणं केनापि वाग्मिना दृष्ट्वा वादितुं शक्यः। अशक्यमिति विशेषित मदृश्यमिति। सर्ववाग्मिनस्सर्वप्र- ... णापि ह्येवं किंचिदपि दृष्टुन्नशक्ता इत्यर्थः।

ननु दृष्टृदृश्ययोः स्वपरभावत्वात् ग्राह्यतामापन्नसर्वं सर्व- -स्ताद्वत् परात्मनि ... स्य ग्राह्यत्वं विद्यते वा न विद्यत इत्युच्यते। अग्राह्यमिति। दृष्टृदृश्ययोर्द्वयोः ... प- -कत्वात् घटवत् ग्राह्यत्वन्न भवतीत्यर्थः। ननु परमात्मा इदन्तया परिच्छेत्तुं योग्यो भवति वा न भवतीति। अचिन्त्य- -मिति। अचिन्त्यमहि ... मात्मेति कश्चित् ... विद्यते वा नवेत्यत्र सनातनमिति। सर्व ... त्र सिद्ध- -भवेत्यर्थः। एवं श्रुतौ ब्रह्मेति परमात्मेति निरन्तरं सर्वदा पदे पदे सोऽहमिति परमेस्मरेत्।

. - - - , - - - -

. - . . - -

.. एवं किञ्चिदपि नास्त्येवेति निश्चययुक्तो परमात्म-

In Public domain. Digitization Muthulakshmi Research Academy

-स्वरूपभावनयावतिष्ठ ता। . . - . - - .

. . . - - . - - .

. - - - . . .

. . . - - . . . .

३५८.६: . . स्थये यस्य ज्ञानाचारस्यो . . क्रमा . . . - .

. - - - - - . .

. - - - - . . .

। ज्ञानाचारप्रकरणम् ॥

. . - - . . - - - - - - - -

-क्षात्कारज्ञानोपदेशप्रकरणं प्रथम . . - - .

. - - . - - - .

. - - . - - .

. - - . . . समाधिनिष्ठस्य नित्यकर्मा-

-पि नादरणीयम्। किं पुनरन्याचारोऽपेक्षेति भावः।

किञ्च।

अग्निकार्य - . - . . —— — — —

. - - . . काग्निकार्यादि कामिक . - -

. . . नित्यनैमित्तिकानां स्थित्यर्थन्तस्यापि विहित-

-त्वात्। यदुक्तम्।

नित्यनैमित्तिके कुर्यात् प्रत्यवायजिघांसया ।

In Public domain. Digitization Muthulakshmi Research Academy

मोक्षार्थी न प्रवर्तेत त . . . . इति । किञ्च ।
नियमोऽपि न तस्यास्ति क्षेत्रे पीठे च सेवनम् ।
नियम इति । . . . . . तैः विनान्यो क्रोधादिरिव ।
यदुक्तं । अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
अप्रमादश्च पञ्चैते नियमाः परिकीर्तिता इति ॥
नादरणीया यत्र । क्षेत्रे पीठे च सेवनमिति । महालयादि-
-क्षेत्रे च रेणुक . . . . रपीठे च । तदीश्वरसेवनञ्च तस्य
नादरणीयमिति । ननु प्राक्

शिवतत्त्वगुणामोद शिवधर्मावलोकनम् ।
तदेव जन्म साफल्यमित्यादिना शिवयोगनिष्ठस्यापि
शिवालयसेवनादेर्विहितत्वात् कथमत्र निषिध्यते ।
सत्यम् । तस्य क्षेत्र . . . दिनास्थि प्रयोजनाभावेऽपि
स्थित्यर्थमाचरणीयमेवेत्युक्तं प्राक् । इतः परमपि वक्ष्यति च ।
क्षेत्रे पीठे च सन्देहात्तु . . . . . कौतुकमिति च ।
स्वयं पतित पुष्पैश्च कर्तव्यं शिवपूजनमिति च ॥

ततोऽत्र तु काशिमरणान्मुक्तिरिति नान्यथेति पुराणेतिहा-
-सादिषूक्तं श्रुत्वा शिवत्वभावनां विहाय तदेव मुख्यतया
नादरणीयं क्षेत्रसिद्धमुक्तेरपरत्वादित्यय . . . क्षेत्रमात्र-
-निरासाय नित्यादिनामेव निषिध्यते न तु मुख्यतयेति
मन्तव्यम् । किंच ।

In Public domain. Digitization Muthulakshmi Research Academy

नार्च्चनं पितृकार्यादि तीर्थयात्राव्रतानि च ।

नार्च्चनमिति नैमित्तिकनित्यपूजायास्थित्यर्थमनादरेण कर्तव्यतयोक्तत्वात् पितृकार्यादि सन्निधानाच्च क . . . . . र्च्चनादिकमेवात्र निषिध्यते । तदेतदादिकमेवास्य मुख्यनिषध इति मन्तव्यः । अथ शिवयोगिनो धर्म्माधर्म्मौ कृतौ यद्युपरोप्य बीजमिव फलवन्तौ नस्यातां लोकाचारञ्च लौकिकेष्टापूर्तादिकर्म्माणि चातिथि सत्कारादि लौकिकक्रियादिकञ्च निरशेषमेव त्यजेदित्युच्यते ।

धर्म्माधर्म्मफलन्नास्ति नातिथिर्लौकिकक्रिया ।
सन्त्यजेत् सर्वकर्म्माणि लोकाचारञ्च सर्वशः ॥

ननु चात्र लोकाचारान् सर्वांस्त्यजेदित्युक्तं विशेषशास्त्रविहित समयाचारश्च त्याज्यो वा नवेत्यत्र समयाचारान्नत्यजेदित्याह ।

समयाचारनिश्शेषं कृत्यजातन्तु बन्धनम् ।

समयाचारमात्रं नितरां शेषं यथा भवति तथान्यं विशेषशास्त्रविहितमपि बन्धहेतुकं कृत्यजातं सर्वं त्याज्यमेवेत्यर्थः । तस्य समयाचारस्य जीवितावधि कर्तव्यतयोक्तत्वात् । किञ्च । संकल्पञ्च विकल्पञ्च न चान्ये कुलधार्म्मिकाः । नेति त्यजेदित्यर्थः । अथ योगिनस्तात्म साक्षात्कारेण शिवयोगे कृते णिमादि सिद्धिभेदा स्वयमेवाभिमुखतो

In Public domain. Digitization Muthulakshmi Research Academy

लभ्यन्ते तथापि तान्सर्वान् योगफलत्वेन न मन्येतेत्यु-
-च्यते ।

सिद्धिश्च विविधाकारा पाताळादिरसायनम् ।
प्रत्यक्षेणाभिलभ्येत नैव गृह्णीत साधकः ॥

विविधाकारासिद्धिरिति श्रीमन्मृगेन्द्रोक्त . . . . .
प्राणायामाभ्याससिद्धिफलत्वेनोक्तोच्चाटनाकर्षणस्तम्भ-
-नादयश्च प्राणादिजयेषूक्तस्वेच्छया स्वदेहधारणत्वं
स्वेच्छया भुक्तोपि मलमूत्राद्यभावत्वं सर्वभाषाप्रभाषण-
स्वातन्त्र्यवाक्त्वं जरादिवर्जितत्वं - - - - णमरु-
-त्प्रेरणत्वा . . . . णिमामहिमालघिमागरिमाप्राप्ति-
-प्राकाम्येशत्ववशित्वरूपाष्टसिद्धयश्च । पाताळादिरसा-
-यनमिति श्रीमत्भैरवोत्तरोक्त पाताळ . . . नजरामरण-
३५५-२. . . . . तत्र सर्वव्याधिव्यपोहनत्व सहस्रगजबलत्वा-
-दि सिद्धि विषयोक्त ब्रह्मवृक्षरसायनादिकमुच्यते तत्सा . . स्वय-
-मेव फलदानाय प्रत्यक्षेणाभिमुखं लभ्यते . . . . - - -
. . . . . नैव गृह्णीतेति तदेव मुख्ययोगफलतया
नैव गृह्णीतेत्यर्थः । ननु तेषां सिद्धिभेदानां मुख्यहेतुत्वेनो-
-क्तत्वात् किमर्थन्त्याज्यतयोक्तमित्यत्रोच्यते ।

सर्वे ते परा . . . . . . स्युरूर्ध्वोमार्गप्रदायकाः ।

- - - - भेदशरीरयुक्तस्यैव शिवपदादधोवर्ति-

In Public domain. Digitization Muthulakshmi Research Academy

सर्वाध्वसु स्वस्वसिद्धि फलदायका भवन्ति । ननु निष्कळस्य

ततः परोऽऽत्मनो महाप्रळये स्वस्व भुवनक्षये पुनर्बन्धहेतु-

· · · बन्धा एव स्युरिति त्याज्य तयोक्तमिति · · ·

· · · · एव मोक्षमपि प्रदायका भवन्तु को दोष इत्यत्रो-

-च्यते ।

एतैर्नास्ति परामुक्तिश्चिद्रूपं व्यापकं विना ।

येन केन विशेषेण सर्वावस्थोऽपि योगभृत् ॥

योगभृदिति योगाभ्यास बलेन तत्तत्सिद्धि भृद्योग · · ·

· · · · शैवेण सर्वावस्थोपीति सर्वाध्व सुस्थित सर्ववस्तु

सर्व · · · नश्वर रूपेणावस्थित सामर्थ्य युक्तोऽपि शिवपद-

-स्य परामुक्तिं व्यापकत्वादि धर्म युक्त निष्कळ चिद्रूप ध्यान·

-समाधिना विना तैस्सिद्धि भेदैर्न प्राप्नु · · · · · ति।

तेषान्तत्र प्रगमाभावादिति भावः।

अथैतत्त्व · · · क्षमस्ति वा नवेति सन्देहात् काश्यादि-

-पञ्चाष्टक क्षेत्रेच रेणुकाद्युपर पीठनामक्षेत्रेच मोक्षा · ·

-हान्नकुर्यादित्याह ।

क्षेत्रे पीठे च स · · · · · · यदि कौतुकम् ।

सन्देहादिति सर्वशास्त्र विहित परमात्मज · · मुक्तौ

सन्दिग्धस्य क्षेत्रपीठादिष्वपि सन्देहो भवत्येव तस्मात्त-

-स्य तदुक्त मुक्तिरपि न स्यात् ।

In Public domain. Digitization Muthulakshmi Research Academy

तदुक्तं सिद्धान्त सारावल्याम् –:

दीक्षा वैकल्य युक्तास्स · · · · · सन्दिहानां न यान्तीति।

ततस्सन्देहाद्यदि कौतुकं वर्ज्जये · · · के सन्देहाभाव·

·युक्तश्चेत् तत्रात मुक्तेरपरत्वात्तत्रास्पृहोपि स्थित्यर्थं वा

ससेवादिकं कुर्यान्नवर्जयेदिति भावः।

तदुक्तं श्रीमत्सर्वज्ञानोत्तरे –:

· – – – – – रुद्रा अति गुह्याष्टकास्तथा ।

गुह्यात् गुह्याष्टकाश्चैव · · विन्नाष्टका वाव च ॥

स्थाणवष्टकाश्च पञ्चैते नियोगात् भूमिवासिनः ·।

अनुग्रहाय जन्तूनां लिङ्ग भूताः प्र · · ताः ॥

तद्वालय समीपस्थं यद्यत्तोयं – – – – ।

· · · · ·र्थं परं पुण्यं तत्र स्नात्वा शिवं व्रजेदिति ॥

शिवमिति तत्तद्भुवन प्राप्तिरित्यर्थः। तदुक्तमन्यत्र ।

ये त्यजन्ति स्वकान् प्राणान् स्थानेष्वेतेषु मानवाः ।

ब्रह्माण्डन्ते विनिर्भिद्य · · पञ्चाष्टकं पदमिति च ॥

महाभारते –:

रेणुक · · · · · · कालः कालीवटेश्वरः ।

कालञ्जरे महाकाल ऊषरस्सर्व उच्यते ॥

ऊषरेषु बीजमिव तत्सत्क्षेत्र वसतान्नराणां पुनर्ज्जन्म

न विद्यत इति · · · त्वेन रेणुकादीन्युक्तानीति

In Public domain. Digitization Muthulakshmi Research Academy

मन्तव्यानि । अथ . - - - - - - . णां स्नान

:भूभाद्दीनामकरणे प्रत्यवायाभावस्योक्त . - - .

. . . - - . . . . . - - त्पक्षः ।

तद्युक्तमेवेत्युच्यते ।

क्रिमि . . . द्रुमांश्च तथा द्विविनस्पतीन् ।

न नाशयेत् बु - - - - - - - .

परमार्थ . - - - .

. . . - - - - .

. - - - - - .

. . . . . परमार्थविक्किल बुद्धो योगी

. . . . - . .

तस्मात्

. . - - - - .

. . - - . - .

. . . . ष्ठेवेति भावः। अथ लोकधर्म्मि ` - .

. . - - - - .

347.b. . . - - - - .

. . . - . . -

. . . - - - .

. . . .

. . . . . . - -

In Public domain. Digitization Muthulakshmi Research Academy

. . . .

. . . .

. . . . . पुष्पादीन्युच्यन्ते। अतिपक्व-

मेव स्वयं पतित . . . देह . . . . ।

तदुक्तं श्रीमन्मतङ्गे . .

. . . .

क्लेशजात दुर्गन्ध . . . . . .

. . पर्युषितान्यन्यत्रोपयुक्तानि वा क्वचित् ।

सम्मु . . . . . . नदेयानि महामुने इति ॥

च शब्दाद्दुष्टताद्यैर्वा कर्त्तव्यमिति। अ श्रीमद्दिरति

कालोत्तरादिषु विहिताष्टविध प्रत्ययश्च गुरूणामेव न

ज्ञानिनामित्युच्यते।

मारणोच्चाटनादीनि विद्वेषस्तम्भने तथा ।

ज्व . . . . . . वश्याकर्षणमोहनम् ॥

न कुर्यात्क्षुद्रकर्म्माणि काष्ठपाषाण पूजनम् ।

क्षुद्रकर्म्म सिध्यर्थं श्वेतार्क्कादि काष्ठेषु मनशिलादि

पाषाणादिषु च शिवपूजन . . . . न ज्ञानिनामिति

भावः। किन्तु सर्वत्र समदृष्टिरेव . . . . . ।

समो मित्रेच मित्रे च समो लोष्टे च काञ्चने ।

अभिलाषो न कर्त्तव्य इन्द्रियार्थे कदाचन ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथैवं सञ्चरणशीलस्य योगिन स्वात्मनि भयहेतूनां प्रमाणाभावाच्च ... हेत्वाच्च स्वेच्छासञ्चारित्वं भवे-दित्युच्यते ।

... योगी निर्भयो विगतस्पृहः ।

अथ सामान्यविशेषशास्त्रे . सर्वेषामाचरणीयतयो-क्तमुख्याचार मतमादिशाचरणीय इत्युच्यते ॥

समनिन्दा प्रशंसश्च सर्व ... समस्तथा ।
समदृष्टिस्तु कर्तव्या यथात्म ... ॥

...य ज्ञानिनां लौकिकाचारास्सर्वे त्याज्या भवेत्युच्यते ।

विवादं लोकगोष्ठिश्च कलहांश्च विवर्जयेत् ।
शास्त्रगोष्ठिं न कुर्वीत कुभाषित सुभाषितान् ॥

ता ... सगुणकार्याणि च योगाभ्यासे ... कर्तव्यानीत्युच्यते ।

ईर्षां पैशुन्य डम्भौ च रागं मात्सर्यमेव च ।
कामक्रोधौ भयं शोकं त्यजेत्सर्वं शनैश्शनैः ॥

ईर्ष्या असूया । पैशुन्यं पिशुनभावं काठिन्यमित्यर्थः । डम्भः कपट ... भावं ज्ञानाचारयुक्तस्या-स्य न केवलमात्मज्ञानमेव ... । किन्तु सर्वज्ञत्वमपी-त्याह । सर्वद्वन्द्वविनिर्मुक्तस्सन्ततम्भव वर्जितः ।
अनेनैव शरीरेण सर्वज्ञस्सम्प्रकाशते ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वद्वन्द्वविनिर्मुक्त इति सर्वेभ्य आरब्धकार्य . .
. . . बन्धेभ्यः विनिर्मुक्तस्सन् अनेनैव शरीरेण
जीवाद्भिक . . स्तु साक्षात्कृत्य स्वज्ञानक्रियाकर्त्री-
-र्विभातीति। तदुक्तं रत्नत्रये -:

अनेनैव शरीरेण पराहृयाहिमखण्डिताम् ।
प्राप्नुवन्ति महाधीरा धन्याहि शि ॥

. . . मोक्षेच्छुभिः ज्ञानाभ्यास एव कर्तव्य इत्युच्यते।

ज्ञानेनैव यथा मोक्षस्तथा सिद्धिर्निरर्थका ।

सिद्धिर्निरर्थकेति मुक्तिसुखं सिद्धिर्भेदो न ददातीति
भावः। तथापि केचिदपरिपक्वमला भोगमिच्छन्तस्सन्तो म . . ।
. . . समति प्रयत्नेन कलाणिमादिसिद्धिं प्राप्य पुनरपि
तम आदि पञ्च विपर्ययेणाति दुःखमेव लभन्ते न भोग-
-सुखमपीत्याह ।

तथापि भोगमिच्छन्तस्सिद्धिमिच्छन्ति साधकाः ।
एवं स्वात्मानं साक्षात्कृत्य तत्रैवात्मनि नि . . . .
. . . . माधिश्च कर्तव्य इत्युच्यते ।

अणिमादिगुणावाप्तिर्जायतां वा न जायताम् ।
तथा विमुच्यते देवि पतिं विज्ञाय निर्मलम् ॥

पतिं विज्ञायेति तत्र दृष्टदृष्टव्ययोस्सत्मशिवयो र्व्याप-
. . . . . . पृथक् भावात् किन्तु

In Public domain. Digitization Muthulakshmi Research Academy

348-a . . . .

. . . .

. . . .

. . . .

. . . .

. . . .

द्वादशैतानि कारणानीति । एवं शिवैक्यं गतस्य शिवयोगिनो देहएव . . . .

. . . .

. . . .

. . . . शिवस्य सर्वाधिष्ठातृत्वेन शिवाद्यवनिपर्यन्ततत्त्वभुवनात्मकश्च तत्र स्थित त्रिविध-देहात्मकश्च . . . .

. . . .

. . त्वारेण युक्तशिवयोगिनो महिमोच्यते । ईदृशं ज्ञानिनं दृष्ट्वा पूजयन्ति च ये नराः । . . . . .

. . . . ॥ . . . .

. . . .

. . . . ज्ञानात्तत्फलमवाप्स्यन्त्येव ।

तदुक्तं श्रीमदचिन्त्यविश्वसादाख्ये –:

In Public domain. Digitization Muthulakshmi Research Academy

1907

पयः पानेन पित्त० . . . . - - -

. - - . ——— . - - .

. . . . . . समाप्नुयात् ।

निन्दाकरस्य तन्निन्दायाः फलं पापमवाप्नुया . . . : ।

अथ व्याख्यातस्योप . - - - . . -

. - -

. - . . - . त्वया पृष्टं कालज्ञानं ज्ञानाचारञ्च

प्राया कथितमिति व्य . . . तोपसंहारः ।

किमन्य . . ८ . - . - - - . .

. . . . . . - . . - - .

. - . . . तरे व्याकृतम् ।

मायावादतया ततः कुबुधिया चान्यै . . ततोऽहैव .

ज्ञान दृश . . . . . - - - . . .

. - . . . - . . . - . .

. . . . ज्ञानाचारप्रकरणं द्वितीयम् ॥

श्रीमदरुणाचलायनमः ओम् ॥

——— x ———

Copied by,
S. Venkataraman
9-3-70

In Public domain. Digitization Muthulakshmi Research Academy